कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M808 विषय पुराण

नाव. वरदा नदी महात्म्य. cm85.

लेखक/लिपीकार दीनानाथ पाठक (लिपिक)

पृष्ठ 27. काळ — पूर्ण/~~अपूर्ण~~

वशिष्ठामहात्म्यं

॥ अथवशिष्ठमाहात्म्यप्रारंभः ॥

वरदा नदी माहात्म्य

१ श्रीगणेशायनमः॥ श्रीमहात्रिपुरसुंदर्यैनमः॥ यस्यांगुष्ठजलंदधारशिरसागौ
रीपतिःसादरंश्रीनारायणसंज्ञयावितरतिश्रेयांसिभूयांसियः॥ स्मर्तॄणांबहुज
न्मसंचितमहापापौघबद्धांगिनांसोयंवोविदधातुनिर्मलमतिंवैकुंठवासीहरिः
१ शौनकादयऊचुः॥ श्रुतंब्रह्मांडखंडेतुमहात्म्यंतीर्थसंततेः॥ तत्रयावरदाख्याता
कास्तेसानिर्गताकुतः॥ २ केनसाप्रार्थितासूतसम्यक्स्नानात्किंफलंभवेत्॥ इतिविस्तर
तःसर्वमस्माकंकथयस्वभो॥ ३ सूतउवाच॥ शृणुध्वंमुनयःसर्वेपुरावृत्तंकथानकं
ब्रह्मांडाख्यपुराणेतुकंविंध्यखंडोद्भवंपरं॥ ४ श्वेतवाराहकल्पेतुहिरण्याक्षोमहा
खलः॥ वेदमंत्रापहारिभ्रांतोब्रह्मान्भ्रूश्याकुलोभुवि॥ ५ क्षणंविचिंत्यतत्रैवश्रुतिमंत्रैर्वि
मृद्ध्ये॥ निर्जगाममतपस्तप्तुंमहातीर्थंवितर्कयेत्॥ ६ दक्षिणायांव्रजन्दृष्टस्तेनविंध्यः॥ १
कुलाचलः॥ उत्तुंगशिखरैरम्योदरीवनसमाकुलः॥ ७ अनेकतरुसंसक्तःपरितश्चतपोधनैः॥

ऋषिगंधर्वसिद्धानांसुराणांकेलिशोभितः॥ ८ अप्सरोनागकन्यानांक्रीडावनविराजितः॥
यस्मादभ्रूच्छायाणमहोनदःपरमपुण्यदः॥ ९ रेवामहानदीचेतिपुण्यैर्वहुफलप्रदाः॥ ता
सांजन्मयतोजातंतदृष्टंचमहत्सरः॥ १० सेवितंसर्वदेवैर्यत्सर्वदामरकंटकं॥ नर्म
दाशोणमहाख्यसरितोजन्ममंडलं॥ ११ कानमानिकलसस्पृष्टे नदीनदसमाकुलः॥
ना॰१ देवासुराहवेपूर्वंदैत्यैस्तामरैश्चयत्॥ १२ निरालंकलयासर्वैःसेवितंविजयार्थिभिः॥ स्त्र
तत्सेवनभवात्पुण्याज्जयंप्रापुरकंटकं॥ १३ ततोविख्यातितांप्राप्तंतन्नामामरकंटकं॥
ततोरेवानदीजातानानातीर्थगणैर्यया॥ १४ तिलांतरेणतीर्थानिकोटिशस्तत्रतर्कयेत्॥
गत्वाविंध्याद्रिसंघातंमहापुण्यफलप्रदे॥ १५ ऋक्षाख्यःपर्वतोदृष्टोधात्राचपुण्यपर्वतो॥
यःसुरद्रुमवनोपेतःकदलीवनराजितः॥ १६ चंपकाननमालाभिःसर्वतःपरिशोभितः॥
नानावल्लीविशल्यादिलवलीवनभूरुहैः॥ १७ लवंगलतिकाशोकशालमंदारजातिभिः॥
शल्लकीशाल्मलीचूतैःककुभार्जुनभूरुहैः॥ १८ गुग्गुलुकोटसंहोटैःपारिभद्रैर्महाद्रुमैः॥
बदरीमातुलिंगाद्यैश्चंपकादिमनोहरैः॥ १९ नानापुष्पफलैर्युक्तःसुगंधिवनराजितः॥

२

ग्रोभितोवटपालाशाम्रक्षप्लक्षपिप्पलखादिरैः २० तमालतालहिंतालश्रीफलकुंभसंशोभितः
घनस्तवकसंशोभाढ्योवकुलैर्मधुकादिभिः २१ परितोनिबिडस्निग्धछायाविश्रांतिशोभि
तः नानाकुंजलताछन्नसंभूतोभिल्लपल्लिभिः २२ देवगंधर्वमुनिभिराश्रितःपुण्यहेतवे शुं
भासुरनिशुंभाद्यैःसेवितोतिसुखायच २३ वनाश्रयसमाकीर्णैःकंदरालितिरोहितैः
गजव्याघ्रमृगैःसिंहैराजितोवनवासिभिः २४ भल्लूककटकैःकोलैर्द्वीपिभिर्मृगवानरैः
माहिषैर्गोव्रजैःखड्गैर्महामृगवरैस्तथा २५ गंडगंधविडालैश्चसेवितोन्यैःशुकादिभिः
सेवितःपक्षिसंघातैराजहंससिखंडिभिः २६ भारद्वाजभुकैश्चाषैःकोकिलाकलकूजितैः ।
मंडितोभृंगमालाभिर्मधुरस्वरगुंजितैः २७ पुष्पपादपचूतांतैःसुंदरोऽक्षपर्वतः
दृष्टोविश्रांतिलक्ष्म्यातत्रआस्थितिंययौ २८ ध्यानावस्थःसमाधायचक्षुरुन्मील्यपादपं ।
अपश्यत्तस्यमूलेचहरिंवाराहरूपिणं २९ सालंकस्तुतिमाकर्तुंनम्रीभूतःपितामहः ।
हर्षगद्गदवाग्गुंफैःपुलकालिसमाकुलः ३० ब्रह्मोवाच नमोवाराहरूपायनिर्गुणायगुणा
त्मने अरूपबहुरूपायहरयेपरमात्मने ३१ सूतउवाच इतिस्तुत्वाननिंदलंवाशितोबद्धतांजलिः

२

तावदेकमुनिंवृद्धंब्रह्मैवापश्यदास्थितं ३२ ब्रह्मध्यानमितंतंच ब्रह्माणंमुनिरानमत् मिथ
श्चसहलीलस्यसमौस्थितौचलयंतौ ३३ शौनकादयऊचुः समुनिःकोयवाराहःकिमर्थंतत्र
संगतः उवाचमधुरंवाक्यमासीनंकमलासनं ३४ + तत्सर्वंस्तत्वृत्तांतंकथयाखिलतःपरं ३५ सूतउ
समुनिःकपिंजलाख्योब्रह्मविष्णुविमानसं + कपिंजलउवाच ॐभूर्भुवस्वराधीतपदकारण
कारणः कलिस्कंधपरिच्छिन्नमंत्रगरुरपारगं ३६ विंध्यस्याधुक्लतंचात्रत्वदीयागमनादरं
धन्यास्तिगिरिराट्चायंत्वंच धन्यतमःसदा ३७ एनंदृष्ट्वाविज्ञेयाश्चेतवाराहरूपिणं
ब्रह्मोवाच मुनेत्वंकोसिमेब्रूहिकारणंचात्रतत्किमु ३८ केनैवकारणेनात्रवाराहीवाहरेःस्थितिः ।
एतत्सर्वंसमाख्याहियतोवृद्धोसितत्त्ववित् ३९ मुनिरुवाच कपिंजलोमुनिश्चाहंसिद्धयेमंत्र
यसांमया आकल्पंसेव्यतेशैलोहरिविश्रांतिगोचरः ४० अस्माद्दक्षगिरेःभंगान्निर्गताःसरि
तःशुभाः तापीपयोष्णीवरदानिर्गताऋक्षपर्वतात् ४१ वाराहीभारतीभीमाभीमचंडीचपावनी
महामारीतथालक्ष्मीविख्याताःसर्वमंगलाः ४२ शक्तयःसंतिसंतुष्ट्येपर्वतेस्मिन्मनोहरे
शंकरोविष्णुनासाकंस्वगणैश्चसमावृतः ४३ वसन्नास्तेसविंध्याद्रिपादेऋक्षभिधेपरे

॥श्री॥

श्वेतवाराहरूपेण माधवोयं वसेञ्चलः ॥ ४४ ॥ महापुण्यतमस्यास्य माताज्येष्ठांबिकालयः ।
यस्माद्देवनदीजाता महापुण्यतमा गिरेः ॥ ४५ ॥ अत्रैव नारदः सिद्धिं तपसा गालवो मुनिः ।
अवाप्तो धनदो भीमो गर्गो वृष्णिध्वजो नृपः ॥ ४६ ॥ कार्त्तवीर्यार्जुनश्चैव लब्धोल्पतपसा फलं ।
श्रेयसोतिशयाद्यत्र सिद्धयः संति पार्वती ॥ ४७ ॥ कनीयानस्य विख्यातो ब्रह्मपुत्राभिधो गिरिः ।
यत्रागस्त्यादिमुनयः कृतार्थाश्च बभूविरे ॥ ४८ ॥ अन्यत्किंचास्य माहात्म्यं कथनीयं पितामह ।
यज्ज्ञातं तं तपानेव विज्ञातं तेऽघमर्षण ॥ ४९ ॥ एतस्मिन्कल्पपर्याये स्वपुत्रान्हितमानसः ।
वसिष्ठस्तपसा सिद्धिं संप्राप्तः सुतसिद्धिदां ॥ ५० ॥ वरं प्राप्तो वराहस्य भजनादुरखेटके
औदुंबरे महातीर्थे वाराहस्यांबुपूरिते ॥ ५१ ॥ साक्षादुदुंबरो ब्रह्मन् तवैव वपुषा गिरौ
सुस्वादु सुधयातुल्यफलसंपत्तिरेयले ॥ ५२ ॥ यस्य स्वादुफलैः सर्वे मुनिसिद्धगणाः सुराः ।
वैकल्पपदवीं याताः कस्मिंस्मिं चतुरानन ॥ ५३ ॥ तीर्थं युगपरत्वेन पुण्यदं कथितं बुधैः इदं
चतुर्युगीमध्ये पुण्यमौदुंबराह्वयं ॥ ५४ ॥ ब्रह्मोवाच मुने कोलहरत्वं वै तत्कथितं च वया नम

२

तथा तुवैस्तराज्ञातो मनोत्थकमनोरथः ॥ ५५ ॥ कीदृक्कास्ते च तत्तीर्थं वाराहं वरदं शुभं । य
सिष्ठस्याश्रमः कास्ते दर्शयाशु तपोनिधे ॥ ५६ ॥ कपिरुवाच अयमेवात्र वाराहोप्ययमौदुंबर
स्तरुः एषा पुष्करिणी ख्याता तीर्थमौदुंबरं विधे ॥ ५७ ॥ अत्रैव सिद्धयः सर्वा विशेषात्संति जीविनां ।
तपसोतिशयाद्योग्यं हृष्टं कैवल्यदं नृणां ॥ ५८ ॥ यस्य दर्शनमात्रेण मुनयो गतकिल्बिषाः
भवंत्यत्र न संदेहः किं पुनर्मानवा विभो ॥ ५९ ॥ सूत उवाच इत्युक्त्वांतर्दधे तत्र कपिर्वाराहसंयुतः ।
तदाश्चर्यं च सहसा ब्रह्मा कौतूहलं ययौ ॥ ६० ॥ ततो ध्यानं समाधाय चिंतयामास तद्दृढं सं
स्कारैः प्राक्तनैर्जातैः भ्रांत्या भ्रांतमानसः ॥ ६१ ॥ आप्तवाक्यप्रमाणेन तत्तीर्थं कार्त्तिकेयनः भवत्
अहो तदेव तीर्थं हि भवेत्पुण्यतमं महत् ॥ ६२ ॥ अनुभूतं च तत्सर्वं गतकल्पांतरे मया । अ
धुना किं विकल्पेन बहुना भ्रमचेतसा ॥ ६३ ॥ सेवयामि विशुद्ध्यर्थमिदं तीर्थमिति ध्रुवं
तपसे सोद्यमो जातो विरिंचिर्विस्मयात्मकः ॥ ६४ ॥ इति श्रीब्रह्मांडपुराणे विंध्याद्रिखंडे वर
दामाहात्म्ये ब्रह्मणस्तीर्थप्राप्तिर्नाम प्रथमोध्यायः ॥ १ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ शौनक उवाच
इत्याख्यानं त्वया प्रोक्तं विचित्रं परमं महत् ॥ अत औदुंबरे ब्रह्मा कृतवान्किं वदाशु तत् ॥ १ ॥

॥ ४ ॥

सूत उवाच विधातोदुंबरं प्राप्तो तपसे कृतनिश्चयः षडंगयोगविच्चैव स्वयं योगमसाधयत् १ कृतवान्‌ चिरं कालं मंत्रयोगं पुनः पुनः एवं कस्य ईशगमन्तप्रसाम कृताविधेः २ वेदो दितक्रियामंत्रान्स्वसामर्थ्यान्विधाय च तपोवसानसमये तत्र पुण्यतपोवने ४ यक्षाकृतन्नु कुविधान्‌ तीर्थयात्रां ततोऽभ्यगात्‌ पदे पदे यथाकालं यथाकालं यथे प्सितं ५ अकस्मात्कमखिलं सर्वमादधात्कृ समीहितं कृत्वा नत्वा च वाराहं ततो लिंगा न्यनेकशः ६ स्थापयन्वरदातीरे विराहाद्दक्षिणे विधिः तत्र तत्र वरं स्थाप्य तीर्थसिवाष लं तथा ७ वरदायाजलस्नानात्पुण्यस्या त्रिशायो नृणां कीर्त्तयन्सर्वतामूलात्कूलकूपा वधिं क्रमात्‌ ८ पुनः पुनः परिक्रम्य वरदायास्तटद्वयं सांगतावूरलाभाय पुनरौदुंबरं ययो ९० वाराहं प्रार्थयामास वेदमंत्रैर्यथाविधि अन्यैरपि वरैः स्तोत्रैर्विविधैश्च समंततः १० ब्रह्मोवाच नमो नमो वराहाय चिल्लवे वेदरूपिणे सचराचरभूतात्मन्नरूपाय व्यापका य च ११ आद्यांडनामनेकानां सुरुपत्तिस्थितिकारण एकैकरोमकूपांतराजलेतेनमो नमः १२ ४

लक्ष्मीनाथ धरानाथ जगन्नाथ कृपानिधे विश्वव्यापिन्नमस्तेस्तु विष्णो वैकुंठनायक १३ दीननाथाय नाथाय परब्रह्मात्मने नमः सर्वतीर्थमयायादिपुरुषाय पराय च १४ शब्दादिगुणकार्यस्य कारणाय नमो नमः येन व्यंजयसे स्वर्गं तद्वा घेतं च कारणं १५ प्रकृतेः परतस्त्वं हि यस्मात्प्रकृतिरव्यया यस्मादमरसंभूतिः संभूतस्पंतगतोहियः १६ दैत्यवर्गान्तर्णी हत्य येन नीतं स्वयं क्षणात्‌ सोयं त्वमेव विश्वात बाह्यवधोत्तसेपरः १७ यन्नाभिकमलाद्धाहं भ्रांतोपि कार्यकारणं त्वमेव सकलं चाघ आभासि चिद्विलासकः १८ या कृत्स्नमंत्राणां सामर्थ्यत्वेन भासते तत्सामर्थ्यममरसामर्थ्यं यस्य सोयं त्वमेव हि १९ यस्य निश्वसितं वेदा वेदनिःश्वसितं च यत्‌ त्वमेव वेदवेदांतं सार्थं सांगमगोचरं २० येन ते सर्वदेवेशा रूपमाभासि गोचरं अगोचरत्वया भासितेनैव त्वां नतोऽस्म्यहं २१ पाहि मां पाहि मां नाथ प्रसादं देहि मे जसा वराह उ० प्रसन्नोहं चतुर्वक्त्र तवाभीष्टं ददाम्यहं २२ तुष्टः परमयास्तुत्या नयावरमुदाहर ब्रह्मोवाच एवमेव वरं देहि रक्षवेदोदितं च यत्‌ २३

यतः श्रुतिमयो सिद्धं तीर्थं वाराहमस्थिरं । इति वाराहवपुषा हरिस्तुष्टो विधेस्तदा २४
वेदाः सांगाः ससामर्थ्या मुनयोत्र च श्रुचिरे २५ इति श्रीब्रह्मांडपुराणे विंध्याद्रिखंडे वर
दामाहात्म्ये ब्रह्मणो वरप्रदानं नाम द्वितीयोध्यायः २ सूत उवाच । वरदायाश्च माहात्म्य
श्रोतव्या पुण्यलभं विधिः पुनर्ब्रह्म वरे तीर्थे वरदातट संस्थिते १ सुखासीनो विश्वक
र्मा स्वयंभूः श्रुतिगह्वरं । चिंतयन्नैकलत्वेन परमार्थस्य साधनं २ तत्र तत्कालमायातो
नारदः सुतपोनिधिः तपस्यंतं प्रजानाथं प्रणिपत्य समाध्यस्व ३ तदेवागस्य शरणं
मुनयश्च प्रतुष्टुवुः ऋषय ऊचुः ॐ नमो भगवते श्रुति संश्रयाय सृष्टि प्रपंच जनकाय ते
पोषनाय तं चार्थरूप परमाय सुरेश्वराय ब्रह्मात्मने खिलजगद्गुरवे विधात्र ४ तत्त्वा
ध्वस्तसमस्तस्य ब्रह्मांडस्य विविक्तहेतु ५ हंस तो ज्ञानकस्मान मघसंकल्पय स्थि
सर्वदा त्वत्तो नारायणो देव त्वं च नारायणादपि ६ शिवसंकल्परूपासि तस्मात्त्वं शरणं
सतां । अनुग्राह्या वयं सर्वे त्वत्कल्पित मुनिप्रजाः ७ पालनीयाः प्रयत्नेन भवता परमेष्ठिना ।

उपेक्षिताश्चिरं कालं इति कारणशंकिनाः ८ आगतास्ते निकं तात सहायं तमपाकुरु । अ
स्मोवाच साधु पृष्टं भवद्भिर्यत्सदागमनकारणं ९ श्रोतव्यमेकचित्तेन वृत्तांतं परमाद्भुतं हि
रण्याक्षेण मंत्राणां बीजं चौर्येण संहृतं १० तेनाहं प्रवरं तीर्थमासाद्यात्र चिरं स्थितः
अत्र वाराह सांनिध्ये तपस्तप्त्वा वरं परं ११ लब्ध्वा यागाश्च संपाद्य तीर्थयात्रादिकं तथा ।
लेहात्र स्थितये तीर्थे महापुण्यं पदे पदे १२ अतः सर्वार्थदे तीर्थे चिरकालं वसाम्यहं
भवतोप्यत्र तिष्ठंतु परमार्थस्य सिद्धये १३ ऋषय ऊचुः धन्या वयं समादिष्टा भवता पेतदुच्यतां ।
कथं तीर्थस्य माहात्म्यं यत्त्वया प्राच्यते विभो १४ ब्रह्मोवाच यन्मया नारदायोक्तं पुरा कल्पांतरे च यत् ।
श्रावयिष्यति माहात्म्यं वरदायाः स्वयं मुनिः १५ सूत उ० इत्याकर्ण्य विधेर्वाक्यं ख्याताः सर्वे सनारदाः ।
प्रस्थिता वरदायां ते तीर्थयात्रादिसिद्धये १६ ब्रह्मापुनश्च यथासीत्तत्रैव श्रुतिगह्वरं
विचिंतयन्परं ब्रह्म सायुज्यार्थविनिश्चयं १७ इति ब्रह्मांडपुराणे विंध्याद्रिखंडे वरदामा
हात्म्ये तु ऋषिगणानां तीर्थप्राप्तिर्नाम तृतीयः ३ सूत उवाच ततो मुनिगणाः सर्वे नारदेन समागताः ।
औदुंबरे महातीर्थे स्नाताः श्रुतिविधानतः १ देवान्पितॄंस्तर्पयित्वा हरिमभ्यर्च्य सादरं

नारदर्षिसमभ्यर्च्यभक्त्याब्रह्मसुतंप्रियं २ हरिभक्तिवरंनित्यंवीणावादनतत्परं त्रै
लोक्यभ्रमणासक्तंसर्वलोकप्रियंगुरुं ३ पप्रच्छशौनकाग्र्योमुनीनांसहितामुनिः।
शौनकउवाच हरिप्रियमुनिश्रेष्ठविरिंचिप्रियनंदन ४ अधुनावरदाख्यानंआख्यस्वसविस्तरं।
नारदउ० श्रावणीयाप्रयत्नेनश्रद्दधानस्यसत्कथा ५ तथाहिश्रुतिपालस्तैःकथनीयंभवेदिह।
यत्सुराकल्पपर्यायेसप्तसनघाउपक्रमे ६ पितामहमुखाद्दस्यतीर्थस्याख्यानमुत्तमं।
श्रुतंतदेवविमलंविस्तरात्कथयामिवः ७ शौनकउवाच कल्पभेदःकथंत्वेषः
ज्ञायतेस्माभिरीरितः योहिद्वपास्वरूप्यःकियन्मानश्चनोकति ८ नारदउवाच।
ब्रह्मायुषप्रमाणेनकल्पसंख्याविभेदितुं कःशक्तोनंतकालेस्मिन्नगाधेदुर्गमा
त्यये ९ नचसंख्यास्तिकल्पानांगतानांपरमेष्ठिनः तथापिकिंचिदस्येवब्रह्मक
ल्पस्यलक्षणं १० श्रृणुशौनकतत्त्वज्ञब्रह्मकंकल्पलक्षणं मासैर्द्वादशभिर्वर्षैर्दि
व्यतदहरिष्यते ११ सुरासुराणामन्योन्यमहोरात्रविपर्ययात् मकरादिकषण्मा

सैर्दिनंदिव्यप्रकीर्तितं १२ असुराणांनिशासैवकर्कादेस्तुविपर्ययात् देवासुराणां
वर्षंचकीर्तितंब्रह्मणापुरा १३ तद्द्वादशसहस्राणिचतुर्युगमुदाहृतं चतुर्युगसहस्रा
णिब्रह्मणोदिनमुच्यते १४ दिनमानप्रमाणेनब्रह्मकल्पोनिगद्यते एकस्मिन्ब्रह्मणः
कल्पेमनवःस्युश्चतुर्दश १५ स्वायंभुवादिविज्ञेयाश्चैकराःसप्ततिर्युगैः चतुर्युगस
हस्रेणभूतसंहारकारकः १६ कल्पोब्राह्ममहःप्रोक्तःशार्वरीतस्यतावती परमायुः
शतंतस्यतथाहोरात्रसंख्यया १७ आयुषोर्धमितंतस्यशेषाःकल्पोयमादितः श्वेतवा
राहकल्पोसौवर्त्ततेब्रह्मणोदिने १८ एतस्मिन्नेवकल्पेतुयाताःषण्मनवोमुने वैवस्वतम
नोयातंयुगानांसप्तविंशतिः १९ व्यतीतास्तेष्वसंख्याताज्ञातावेदप्रमाणतः एवंकल्प
मनोत्पत्तिंब्रह्मणानिर्मितापुरा २० तंनवेत्तियतोनित्यंस्मरामिहृदयंहरेः पुनर्ब्रह्मापु
नरहंतथान्येमानसाःसुताः २१ मरीचिपूर्वाभ्यासोयंसर्गोजननकारणः एवंकल्पेवि
पर्यासे भूमिर्व्यस्ताजलाप्लवात् २२ तीर्थानांव्यत्ययश्चैवजायतेकल्पभेदतः दैत्यपात
कभारेणभूमिर्यातारसातलं २३ तदुद्धारायसंजातावराहोयंसितःपुरा तदेवा

॥७॥

ख्यानमाख्येयं यत्पृष्टं चतुराननात् २४ तदेव सावधानेन श्रोतव्यं भक्तिमानसा ऋषय ऊ
चुः साधूक्तं नारद मुने तीर्थे भक्तिस्तु कीदृशी २५ कर्त्तव्या सावधानेन श्रावणीया च नो
विभो नारद उवाच तीर्थे दानं तपश्चैव भक्त्याय फलदं नृणां २६ सा भक्तिर्द्विविधा ज्ञेया
कर्मज्ञानेन्द्रियोद्भवा सर्वेन्द्रियप्रमुखं ज्ञेयं मन एव हि कारणं २७ तन्मनो विविधं चैव पा
पपुण्यपथानुगं तस्मात्सर्वप्रयत्नेन मनो भावफलप्रदः २८ मंत्रे तीर्थे तथाचार्ये दै
वज्ञे भेषजे गुरौ यादृशी भावना यस्य सिद्धिर्भवति तादृशी २९ मन एव नृणां मुख्यं
बंधमोक्षकरं भवेत् फलं स्नसुण्यभागेणि ज्ञेयं यत्नेन कोविदैः ३० ब्रह्मांडस्थिततीर्थस्य स्नानात्फलमवाप्यते नरः सन्मनसो भक्त्या यथोक्तं सर्वकर्मणां ३१ अंतर्ग
तानि तीर्थानि संति पुंसां फलाप्तये सत्यतीर्थं क्षमातीर्थं धृतितीर्थं तथैव च ३२ ज्ञानती
र्थं तपस्तीर्थं मनोधीनानि संति हि मुनय ऊचुः सत्यादीनि च तीर्थानि प्रोक्तानि फलदा
नि च ३३ कथं मनुष्यलोकेऽस्मिन् क्लेशोऽसत्यादिसंश्रयः नारद उवाच सत्यानृताभ्यां

॥७॥

जीवेत लज्जैश्चैव यत्कलौ ३४ प्रायः परोपकारार्थमसत्यं सत्यतां व्रजेत् स्त्रीषु नर्मवि
वाहेषु वृत्त्यर्थे प्राणसंकटे ३५ गोविप्रार्थे च हिंसायां नानृतं स्याज्जुगुप्सितं भूतानामुप
कारस्तु यथा भवति येन तत् ३६ साधनीयं प्रयत्नेन तत्रानृतभयं न हि तिलेन तिलभा
गेन दानं देयं स्वशक्तितः ३७ सात्विकेन हि भावेन लघ्वनेन फलं महत् धृतिर्यद्यपि
पुंसां न सा भवति वा यदि ३८ तथापि स्वामिकार्ये च गोष्ठीहारे च मोक्षदे तामसेन स्व
भावेन यत्कृतं धर्मसाधनं ३९ तदधर्मत्वमासाद्य हंति पुण्यं पुराकृतं यतिः स्वामी च
पिशुनः तपस्वी ब्राह्मणो नृपः ४० सोढुं योग्याः क्षमायोगा इन्यतो न क्षमा शिवा धैर्यं
स्वाम्याज्ञया युद्धे यः करोति नरोत्तमः ४१ मृतो वा जीवितो वापि जयं मोक्षस्य भाजनं यस्यै
व मनसः शुद्धिः स शुद्धः सर्वतः कलौ ४२ बहिः क्षालनमात्रं च स्नानं पुंसां च शुद्धिकृत्
सु स बाह्यांतरस्नातो यो नरः स सदा शुचिः ४३ ऋषय ऊचुः यदेतत्सर्वमाख्यातं तत्तथैव
न चान्यथा तथापि दुःस्थितानां च कथं तीर्थादिके फलं ४४ नारद उवाच ध्यानेन यात्रा
र्थफलं परस्तु कुक्षसेवकस्तथा प्राप्नोति च प्रसंगेन चतुर्थांशं तथा खलः ४५ तथापि गंगा

॥८॥

वरदा तथा तापी च नर्मदा गौतमीति च पंचानां दर्शनादेव मुक्तिभाक् ४६ सुकृती वा महा
पापी सर्वो वस्त्रांगलोपि वा संस्मरस्य दर्शनेनापि स्वर्गवासी न संशयः ४७ अलमेतत्त्रि
मुक्लेन भवतां शुद्धचेतसां किं दुर्लभं हि संसारे जितानीभिः प्रकीर्णकैः ४८ उपक्रमितमी
र्थस्य सर्वदापि चतुर्युगे तुल्यमेव हि पापो वा सुकृती वा लभेत्फलं ४९ पुष्करं च कृते तीर्थं
त्रेतायां नैमिषं तथा द्वापरे च कुरुक्षेत्रं कलौ गंगा महानदी ५० न भवेदेदमंत्राणां सं
शुद्धिः शुचिमंतरात् मंत्रैर्विना न सिध्यंति यज्ञसिद्धिस्ततो मता ५१ कलिकाले विशेषे
ण शुद्धवस्तु न दृश्यते नष्टे धर्मे तमोरूपे सर्वधर्मभयंकरे ५२ अनवच्छिन्नसंतानो धर्म
तंतुर्हि जाह्नवी अथवा वरदा रेवा पंच नद्यो थवा स्मृताः ५३ कलिकाले महाश्रीतिच्छि
दः संति महीतले ऋषयऊचुः एतास्त्वया समाख्याता नद्यो नेकाः शिवप्रदाः ५४ गंगादि
यो पितासां तु फलमुक्तं युगे युगे परमा दुर्लभा मुक्तिः संसारो यं भयंकरः ५५ अनेककल्प
पुण्यानां भोगभोग्यो महोदधिः ईदृशं युगेषु कथितं कथं सिद्धिप्रदं विभो ५६ सर्वतीर्था
न मरव्यातं स्नानेन हि तमुक्तिदं तस्मान्नर्वार्णवाज्जंतुर्मुच्यते त्रावगाहनात् ५७

८

एतद्धि कारणं सर्वं सोदाहरणपूर्वकं कथयस्व महाभाग सर्वज्ञ मुनिपुंगव ५८ नारद उ०
साधु साधु महाभागा ऋषयः शंसितव्रताः भवद्भिः पृष्टमखिलं साधनं सार्वकामिकं ५९
अतिगोप्यतरं तीर्थं महत्पुण्यफलप्रदं कथयाम्यघलोकानां भवतां च हिताय वै ६०
पुण्यस्यातिशयो यत्र स्नानमात्रेण लभ्यते समं सर्वयुगेष्वेव तपोदानादिकर्मसु ६१
पुण्यकालं विना यत्र स्नानमात्रेण लभ्यते गंगास्नानसमं पुण्यं तदिदं वरदातटं ६२
तत्राप्येदुंबरं तीर्थं कौंडिन्यं परमं शुचि वेणीतीर्थं भिन्नलं तीर्थं यज्ञतीर्थं महत्फलं
+ तीर्थं तथैव कपिवारणं तथैव ब्रह्मतीर्थं च पुण्यश्चांबरिषाश्रमः ६३ जंबुकासंगमश्चैव
महापुण्यफलप्रदः ततोतिफलदं +६ सोमतीर्थं च माहेंद्रं सिद्धिनाथेश्वरालयं ६५
चूडारत्नासंगमश्चैव गांधर्वं चांजलिप्रदं विदर्भसंगमः पुण्यो धर्मकामार्थसिद्धिदः ६६
कौशिकीसंगमः श्रेयान् प्रयागेन समस्तथा कालकामेश्वरं तीर्थं गोदावर्यंतिरस्थितं ६७
अन्यान्यपि कोटिशः संति गव्यूत्यर्द्धांतरेण च तत्र यत्फलमाहात्म्यं सर्वं भ्रमसमुत्थितं ६८
तत्सर्वं कथयिष्यामि शृणुध्वं सुसमाहिताः स्नात्वा चाचम्य सर्वतीर्थेषु यत्फलं लभेत नरः ६९

नस्फलंसमवाप्नोतिवरदानामकीर्त्तनात् ७० अनयाविष्णुरूपायवाराहायवरोमहान्
दत्तस्तेनततःसोपिवरदेस्मिन्स्थितोभुवि ७१ वाराहाख्यामिलंतीर्थंतस्माद्वाराहसंज्ञितं
अभवच्चततोलोकेवाराहस्याःसमंमहत् ७२ पूर्वंकोलावतारेणहतादैत्याःस्वदंष्ट्रया
उध्धृतामेदिनीतूर्णंहिलयेवरसातलात् ७३ मंत्राणांभुद्धयेधातुर्वरोजतोविमज्जनात्
नत्कल्पनेनजायंतेभुवनानिचतुर्दश ७४ शिवेनशिरसाभक्त्यावंदिताचवरार्थिना
अंधकाद्यान्सुरोघांश्चजघानविजयंततः ७५ शिवचूडालयागंगावाराहेणार्थितापुरा
तदंगमलिरूपेणवरदावतरद्भुवि ७६ योनरश्चलितस्नातुंतस्यपित्र्यादिपूरुषाः
नंदंतिविष्णुलोकेतेजाताविगतकिल्बिषाः ७७ यांप्राप्यसलिलंदृष्ट्वापूतःसकुलसंभवः
पुरुषोमुच्यतेसत्यंमरणात्तापत्रयोद्भवात् ७८ सर्वदेवमयीगंगायमुनाचसरस्वती
गोदावरीविपाशाचकावेरीचशतद्रुका ७९ शरयुश्चंद्रभागाचकौशिकीगंडकीशिवा
नर्मदावेणिकाकृष्णावेदिकाचवितस्तिका ८० वरदापापनाशाचगौतमीमलहारिणी
एताःसर्वाःसतांदेहाविभेदोनास्तितत्त्वतः ८१ पंपागौरीतथागंगानथैवेयंचगौतमी

विभेदोत्रनकर्त्तव्योनारायणतनूद्भवाः ८२ एतासांतोयतीर्थेषुस्नानात्कैवल्यतांव्रजेत्
नरोदर्शनमात्रेणशुद्धोजन्मशताघहन् ८३ गौरीगंगाविभेदंचयःकरोतिनराधमः
नरकेपच्यतेघोरेसयाहरिहरांतरात् ८४ गौतमीपंचकंगंगानविभिद्येतिताभिथः
तत्रभेदेकृतेपुंसांसघोनरकेसंभ्रयः ८५ अतःसर्वात्मनाभेदानमंतव्याहरीशयोः
अन्यच्चवरदातीरेचत्रतीर्थंमहाह्रदे ८६ चक्रेश्वरंभवेच्चक्रीशिवस्तस्यसपादिह
संतिपाषाणगर्भेषुदक्षिणावर्त्तकेब्ध्वः ८७ अद्यापितेचदृश्यंतेचक्रतीर्थस्यदर्शनात्
तथैवब्रह्मतीर्थंचऋक्षपर्वतदक्षिणे ८८ हरेणवंदितातस्मात्तीरंजातंविभूतिमत्
स्थलेस्थलेपिदृश्यंतेयस्यावरदातटे ८९ कुतशेषाणिधान्यानिहवींषिऋषयोध्रुवं
पूर्वंसाधितयज्ञानांब्रह्मादिमुनिपुंगवेः ९० वरदातीरवासेनफलंकाशीनिवासवत्
लभेदवश्यमेतस्मान्मुनिभिःस्तूयतेनिशं ९१ अस्याचलशिरश्चैवंचव्योमचुंबिउदुंबरः
तन्मूलेचनिमेषार्धेवासोमायापुरीसमः ९२ इतीदंसर्वमाख्यानंब्रह्मणागदितंमम

तच्छ्रुत्वा त्रमया त्रैव तपस्तप्तं सुसिद्धये २३ आषाढ्यां पौर्णमास्यां हि स्नादौ नैनं यथाविधि ।
यः करोति नरः श्राद्धमनंतवरदो क्रमे २४ यत्किंचित्तिलमात्रेण स्वर्णं विप्राय दीयते
आषाढस्य तु पूर्णायां कुरुक्षेत्रसमं भवेत् २५ गायत्रीजपमाहात्म्यं ब्रह्मणा निर्मितं पुरा ।
वसिष्ठाय ततो लब्धं तेन विघ्नेः परंपदं २६ इतीदं वरदाख्यानं ये पठंति मनीषिणः
तेस्तु भ्रंते ऽश्वमेधस्य फलं हि मुनयो वरं २७ इति श्रीब्रह्मांडपुराणे वरदामाहात्म्ये ब्र
ह्मोत्कर्ष विधानं नाम चतुर्थोध्यायः ४ सूत उ० श्रुत्वा नारदसंप्रोक्तं वरदाख्यानजं फ
लं मुनयः को लस्य कारणं प्रोत्सुकुधृता १ ऋषय ऊ० हे नारद मुनिश्रेष्ठ त्रैलोक्यहितका
रक धरणीधाकोलस्य किमथात्र स्थितिर्वभौ २ नारद उ० शृण्वंतु मुनयः सर्वे श्वेतवाराहसंस्थि
तेः कारणं सुस्पष्टं चित्रं श्रोतॄणां मंगलप्रदं ३ आसीज्जगत्त्रयं व्याप्तं हिरण्याक्षासुरो
वै तद्धामाच्युतो भूमौ प्रियायुक्तस्तु नंदधो ४ श्वेतवाराहरूपं च महत्क्रूरं भयानकं
अतिश्वेत घुतिस्तीक्ष्ण दीर्घदंष्ट्रो विराजितैः ५ मध्ये हिरण्यरोमाग्रके शेरक्तविलोचनः ।
प्रवाल्गाधाल्किरोपेतः छस्तुपुच्छद्विवस्तथा ६ स्कंधरोमावली पीता हेमरूक्षाग्रसंनिभा

रक्तगंडस्थलोपस्थो महाक्रोधमदान्वितः ७ एवमाविर्भूतत्र वाराहो हरिरव्ययः वाराह्या
च श्रिया युक्तस्तद्विभूत्याति शोभिना ८ अतिध्वनितचित्कारैः कटत्कटेति दंष्ट्रया ।
त्वरया परया छद्दे हिरण्याक्षांतिकं च सः ९ ये युद्धमभ्यागतः क्रूरः कोलस्तेन विलक्षितः ।
हिरण्याक्षेण शस्त्रेण धावयित्वा ततो बलात् १० तेन तच्छलधावत्सा दंष्ट्रया निमिषार्धतः ।
ततः परस्परं युद्धं हिरण्याक्षवराहयोः ११ अभूद्दृष्ट्वा विशीर्णांगो हिरण्याक्षो विमूर्छितः ।
ततो वहासिनिः क्षिप्ते दंष्ट्राग्रेण स कालयत् १२ महत्सु तदरीमार्गात् दुर्गकूपैः प्रवाहिनी
दुर्धरा निर्गता भूमौ हिरण्याक्षेति नामतः १३ हिरण्याक्षो निःपपात व्यंगता सुर्गनां
वरान् अन्येपि निहतास्तत्र तत्रैव च महाहवे १४ अगतां स्वास्थ्यमानंदः समभूरन
तालये तदा वाराहरूपेण दंष्ट्रया वसुधा धृता १५ आकल्पं द्रष्टा नाय सा राजते सकलं
कवत् तत्काले देवसंघाश्च ब्रह्मेंद्रशिवपूर्वकाः १६ विनम्राः परया भक्त्या वराहं
परितुष्टुवुः देवा ऊचुः नमो वाराहरूपाय विष्णवे त्रिगुणाय च १७

१३

निर्गुणाय गुणातीत परब्रह्मात्मने नमः ॥ हिरण्यगर्भरूपाय सदनीताय शार्ङ्गिणे ॥ १८ ॥ नमस्ते व्यक्तरूपाय कल्याय परमात्मने ॥ ब्रह्मांड किंकिणीकोटि कटिभूषाविलासिने ॥ १९ ॥ इच्छा ब्रह्मांडकोटीनां परिवर्त्तकराय च ॥ सबाह्याभ्यंतरस्थे वै चैतन्याय चिदात्मने ॥ २० ॥ श्रुतिकोटिध्वनियस्त रोमकूपाय ते नमः ॥ समस्ततीर्थदृष्टाय सर्वदेवमयाय च ॥ २१ ॥ सगुणाय परेशाय नमो वाराहमूर्त्तये ॥ दशावतारवेधाय नमस्तुभ्यं सुरात्मने ॥ २२ ॥ नारद उवाच ॥ इति स्तुत्या वराहो भूद्धरदो देववाणीया ॥ देवानां स्थानलाभाय वरं तेभ्यो ददौ महत् ॥ २३ ॥ लब्ध्वा वरं सुराः सर्वे निर्भये नांतरात्मना ॥ नाकमंगीकृतं देवैः सेंद्र ब्रह्मपुरोगमैः ॥ २४ ॥ स्वं स्वं पदं समासाद्य ननंदुः सुरनायकाः ॥ २५ ॥ इति श्री ब्रह्मांडपुराणे विंध्याद्रिखंडे वरदामाहात्म्ये हिरण्याक्षवधो नाम पंचमोध्यायः ॥ ५ ॥ नारद उवाच ॥ ततो जगाम वाराहो विंध्याद्रिं सुमनोहरं ॥ नानाविश्रांतिसंयुक्तं सुरसंघर्षिसेवितं ॥ १ ॥ उत्तुंगशिखरैः स्वर्णरत्नधातुविराजितैः ॥ मेरोरधिकसंपत्तिवनस्पतिमहौषधैः ॥ २ ॥ मणिभूम्याकरैश्चैव मृगादिवनवासिभिः ॥

१३

गजैर्मदशलकंडै भ्रमरभृंगादिराजितैः ॥ ३ ॥ मेरोरधिकसंपद्भिः शोभितं वसुधाधरं ॥ यत्र ब्रह्मादिदेवानां तपोवनसमाश्रय ॥ ४ ॥ तत्रोदुंबरमासाद्य विश्रांतिं श्रमकरोभ्यगात् ॥ ततः प्रभृति वाराहः पर्वते त्र च नंदते ॥ ५ ॥ ऋषिगणा ऊचुः ॥ इति यत्कथितं चित्रं विंध्याद्रेर्वर्णनं महत् ॥ किं कृतं येन तत्प्राप्तं मेरोरधिकसंपदा ॥ ६ ॥ तन्नारद महाभाग श्रावयाद्य महद्भुतं ॥ नारद उवाच ॥ एकदाहं गतो द्रष्टुं प्राचीं शस्यामरावतीं ॥ ७ ॥ तदा सुमेरुः संपत्त्या मदगर्वान्वितोभवत् ॥ उच्चैरेव नमस्कृत्य स्थितो न नमिताननः ॥ ८ ॥ पदत्रयं मया दृष्टा व्याकुंचपुनरागतः ॥ मयास्थैव विज्ञातो गिरिः पुण्यमदान्वितः ॥ ९ ॥ ततोहं दक्षिणायां च चलितो वसुधातले ॥ दृष्ट्वा विंध्याद्रिखंडं च प्राप्तोहं तस्य मंदिरं ॥ १० ॥ गिरिणां सहसा तीर्थं कृत्य पूजितोहं यथाविधि ॥ अर्घ्यपाद्याद्यलंकारैः खाद्यैः पुष्पफलादिभिः ॥ ११ ॥ स्तुत्वा नत्वा परिक्रम्य स्वागतं गदतां शुभं ॥ अपृच्छद्देवलोकस्य कारणं परमाद्भुतं ॥ १२ ॥ ततो मयोदितं तस्य देवलोके द्भुतं महत् ॥ बहुनाम कुलाली मेरुः संतत्या नंदते परं ॥ १३ ॥ किं किं तस्यैव सौभाग्यं तत्तपः फलमव्ययं ॥

१२

वर्णनीयं न चैवात्र गुरुणापि भवेत्तथा १४ धारकः सर्वदेवानां जनकः सर्वसंपदां यत्र
कल्पतरूणां च वनमाला सुशोभिता १५ मणयो मीष्टदाः संति परितः पुष्पजातयः
पारिजातादिकुसुमैरम्लानैः पूर्णकंधरः १६ कामधेनुगणा यत्र विचरंति वने वने
ऐरावतादयो नित्यं चीत्कारैर्मोदयंत्यगं १७ उच्चैःश्रवा खुराघातैर्ध्वनयत्यनिशं मुदा
दिव्यकेलिकल्लोलोल्लासो घयंत्यमरांगनाः १८ यत्र तुंबरुहूहू च आयातोऽस्य गणैः सह
समंतात्पुष्पितशृंगैर्हेमरत्नविराजितैः १९ रत्नाकरैर्बैडूर्यैर्धूम्रैस्तैः पूर्णैर्वारिधिः
सुधासमानसामर्थ्यसलिलाशय शोभितः २० यत्र ब्रह्मांडभागेन नाथोंगुष्ठप्रभेदनात्
परामृतरसौघेश्च निष्पपातामरांगना २१ मंदाकिनीति विख्याता नासा चतुर्धाभवद्गिरेः
सिता चालकनंदा च मालती मंगलावती २२ क्रमेण निर्गता मेरोः प्राच्यादिषु दिशिगताः
परितो वेष्टिताश्शैलैस्ताद्यै रैवचाश्रितैः २३ किं दुर्लभं च तस्यास्ति किं न गर्वीत पोबलात्
तथाप्येवं सर्वसामग्री परं त्वेकेन दृश्यते २४ अभिमानबलं मेरोरुच्चतिश्चैव वाधिक्यं । अ
भिमानो न कर्तव्यः सद्धीत्योपार्जने सदा २५ धर्मसाधनहेतौ च तपस्तीर्थजपादिषु

१२

अभिमानो घमारंभो विधेयः सर्वसाधने २६ अभिमानप्रयत्नेन सिद्धिः साध्या सतां मतं
अभिमानप्रयत्नेन चतुर्वर्गफलागमः २७ दीनेषु शशिसौर्ये च विभायां मोक्षसाधने
अतः सर्वात्मना साध्यं साभिमानं वृषार्जनं २८ यस्योद्यमेन नो सिद्धिर्दृश्यते स्वकचिद्भुवि
तस्य कालांतरेणापि फलसिद्धिर्विनिश्चयात् २९ गिरिरूच मुनीन्द्राभिमतं प्राक्तयन्मेमनसि संस्थि
तं दह्यते देहमखिलमभिमानेन मे सदा ३० व्यर्थं मे जीवितं तात यावदुच्चैस्तपोबलं नच
तं विघ्नुनाक्षेत्रामराधनमनालसं ३१ दृढमेतस्याच्च भावेन तेषां वासो ममाश्रमे
यावन्नस्याच्चुतावन्मेन शानं व्रतमस्तु भो ३२ अथ मे त्वं पयात्रूहि पथा मेऽभिमतं भवेत्
मेरोरधिकसंपत्त्या संभवामि कथं महान् ३३ तस्युपायापायसामग्री साध्यं मे च वदस्व भो
स्वर्गउ० विंध्यशैलेऽचिक्रमाकर्ण्य नारदस्त्वहमीहितं ३४ स्थितिं विचिंतये शैलाय पुण्यापायं समादिशात्
नारदउ० तपावधौदुंबरं गत्वा सुध्यावासप्रयाच्युतं ३५ विराहरूपिणं देवं तन्मंत्रेण यजस्व हि
क्षिप्रमालभसे प्रष्टुमिष्टमाकांतर्दधे मुनिः ३६ इति श्रीब्रह्मा० चरदामा० विंध्यना० सं० षष्ठोध्यायः ६

सूत उ० ततश्चौदुंबरं प्राप्य स्नात्वा सरसि पुण्यदे। आराधयन्वराहेशं परेण तपसा गिरिः १ समा
१३ धाय मनः श्रीलोहरौ वाराहरूपिणे दिव्यं वर्षशतं यावत्तावत्तीव्रं व्रतं चरन् २ आ
सीदेकाग्रचित्तेन वाराहं तोषयन्गिरिः ततो देवः प्रसन्नोभूद्विंध्यं प्रोवाच सादरः ३
वरं वरय विंध्येष्टं वाराहो व्यक्तया गिरा वाराह उ० प्रसन्नोस्मि गिरिश्रेष्ठ त्वया परमया नया ४
वरयाभीप्सितं यच्छीघ्रं सर्वं दद्यामि ते विंध्य उ० देवदेव कृपासिंधो सर्वव्यापक सर्वग ५
अंतरज्ञांतरं वेत्सि त्रैलोक्यांतर्गतार्थिनां तथापि त्वद्गिरा ज्ञप्तो याचेहं मेरुसंपद ६
मेरोरधिकतामेत्य देवानां च स्थितिर्मयि यथा भवति तच्छीघ्रं दीयतां मे जनार्दन ७
दत्तं सर्वं ह्यदीष्टं च तत्राप्येकं च साधय शिवं वाराणसीं प्राप्य तोषयात्रागमाय च ८
वाराह उ० मयात्र स्थीयते विंध्ये ब्रह्मणा च तवांतिके ब्रह्मतीर्थं समासाद्य ऋषिभिः सहितेन वै ९ १३
नारद उ० इत्यगोचरमालक्ष्य गतो वाराणसीं पुरीं विश्वेशं पूज्य तत्रैव तपस्तप्तं सुदारुणं १०
विंध्याद्रिश्चरणे रौद्रे लिंगं विश्वेश्वराभिधं संपूज्य तेन विश्वेशं तोषयामास सत्वरं ११

विश्वेश्वर उ० साधु साधु परं तप्तं तोषितोहं गिरीश्वर तपसः कारणं ज्ञातं मया मिलयांतिके १२
प्रेषितं स्कंदमाने तु पार्वती पुत्रवत्सला त्वद्गुहायां समासीनो गुहो गौर्या उपद्रुतः १३
आदौ गौरी त्वया पूज्या सर्वसिध्यैन गोत्तम मयैवागम्यते शीघ्रं दृष्टुं वाराहरूपिणं १४
हरिं सर्वप्रदं लक्ष्म्या सहितं च त्वदर्चितं ततो विंध्यगिरिः शीघ्रं विश्वेशानुग्रहान्वितः १५
गतः स्वस्थानमुन्नत्या वर्द्धयामास पर्वतः हेमाद्रेरभिमानेन परितः संपदां चयं १६ वि
दधत्स्वेच्छया भीष्टं स सत्यलोकावधिं गिरिः वर्द्धितः स्पर्धया विंध्यो बहुभाग्यश्रिया सह १७
उत्तुंगशिखरै रम्यैः सर्वधातुमयैरकैः रत्नाकरैर्विचित्रैश्च सुमेरोः संपदश्रिया १८
कदा गौरी सगौरीशा मदीयाश्रमसन्मुखा आयास्यतीति निजस्वांते चिंतयन्निति सर्वदा १९
काशीमार्गेक्षणो नित्यं शैल आगमनोत्सुकः कुर्वंश्च करपादाब्जं ध्यायन्नेवं मुहुर्मुहुः २०
एतस्मिन्नंतरे गौरी च वराचलकंदरीं प्रविशंती समालोक्य हर्षितस्तस्सुरो नतः २१
अंबां नानोपचारैश्च संपूज्य स्तुतिमावदीत् विंध्य उवाच गौर्यै नमोखिलजगत्परिपाल

कर्त्र्यै सर्गस्थितिप्रलयकारणकारणायै विश्वेश्वरप्रियपुरीनिजपूरणायै तुभ्यं नमः सकल
शक्तिसमाश्रयायै २२ आविष्कृतप्रकृतिप्रलयाच विश्वं संधारितं स्थितितया सकलं स्व
पृष्टे वाराहकूर्मधरणीधरतामिषेण भूमिंद धार कलयांबययायथेयं २३ आघांबिके स
कलशक्तिमयेन मस्तेमां पाहि देहि वरमुत्कटमाषितार्थं नारदउवाच इति विंध्यस्तु
संस्तुतागिरिजा हर्षनिर्भरा वरं ददौ यथेष्टं च तस्मै मेत्वधिकप्रियं २४ अंबोवाच त्वयाखि
लसकलार्थानां सिद्धिरत्र स्थितिर्मम मादस्व सततं विंध्य सह सर्वसुरान्वितः २५ शंक
रोत्र गुहायां ते स्थितिमालंबयिष्यति गुहालीनो गुहः काले तर्कयाभुममात्मजं २६ वि
ध्यउवाच मातस्त्वदागमं ज्ञात्वा शिखिमारुह्य यत्नतः निर्जगाम स्वमार्गेण किंचिधाचलं
कंदरं २६ नारदउवाच एतस्मिन्नंतरे त्र्यंबुधवलाचलमस्तकात् अपश्यत्न्गृहगौरी
विंध्यकंधरसंस्थितां २७ तज्जटाजूटसंचारिगंगातोयं पपात ह उच्चैः कंधरमार्गेण दे
वगंगेति निर्गता २८ सेयं देवनदीख्याता नामीलिता वरदांभसि तत्रैतीर्थं महत्स्थानं सिद्धि
दं मुक्तिदं नृणां २९ जटाशंकरनाम्नेदं विख्यातं मुक्तिदं नृणां तत्र गौरीशिवौ विश्वसिद्धाः संति सनातनाः ३०

ततः प्रभृति विंध्योयं स्पर्द्धया रुद्धितामियात् गगनं रोधयामास यह नक्षत्रमंडलं ३१ तस्थे
तथैव विंध्यस्य शिखरैरूर्ध्वमार्गतः ततः कालांतरे देवाः स्वधास्वाहाविवर्जिताः ३२ अग
स्तिं प्रार्थयामासुः काशीं गत्वा तपोबलात् अमरैः प्रार्थितो गस्त्यो विंध्याद्रिं गर्वितो ययौ ३३
व्याकुंठितगतिर्जातो गिरिं श्रेष्ठ्यस्मयं गतः विंध्याचलेन कुंभोत्थं मुनिं प्रेक्ष्य नतिः कृता ३४
नम्रीभूतेन सत्कृत्य संस्तुतो भ्यर्थितः सदा अगस्तिः प्रार्थयामास विंध्यं तुंगतनुं पृथुं ३५
अगस्त्यउ० हे गविंध्य महाभाग त्वं तिष्ठ नतो भव यावच्छ्रीशैलशिखरं दृष्ट्वा व्याघुट्य चागतः ३६
तावद्वास्तांतथैवासि तथैव मम मदीयतां नारदउ० इत्युक्त्वागस्तिदेवर्षिर्ययौ श्रीशैलपर्वतं ३७
नाद्यापि कुंभसंभवेरेति नाद्यापि वर्द्धते नगः एवं कालांतरे याते वसिष्ठोत्र समागतः ३८
तपसे भीष्टकमार्थं प्रस्तुतीर्थे मनोरमे ऋषयउ० साधकं विंध्यसामर्थ्यं स्तंभितं कुंभयोनिना ३९
वसिष्ठागमनं केन हेतुना किं निगद्यतां नारदउवाच वसिष्ठो प्रस्तुतीर्थं च प्रातं येन च हेतुना ४०
तदेव श्रूयतां सर्वं मुनयो हि समाहिताः पूर्वं त्रिशंकुं भूपालो विश्वामित्रेण सत्तमः ४१
स्वर्गं नेतुं समारब्धुं ऋत्विक् तच्चास्त्रिरर्थितः तेन त्रिशंकुराशिस्सो रे पापगुरुर्निरक ४२

अवमन्य गुरुं योगो न भूयास्त्वयि गतिः ॥ इति शापं ददौ शक्तिस्त्रिशंकुं निंदयंस्ततः ॥ ४३ ॥ स्ना
तुं भागीरथीगंगां परामर्षं गतः पुनः ॥ त्रिशंकुः शापमापन्नो विश्वामित्रांतिकं गतः ॥ ४४
९५ वृत्तांतं कथयामास मुनये परुषाक्षरैः ॥ प्रत्युवाच मुनिर्भूपं पाहि मारयतां त्वरा ॥ ४५ ॥ सश
क्तिर्मुनिशिष्यांश्च तान्बंधनपि मारय ॥ आयाहि यज्ञसिध्यर्थं यज्ञकाले समागतः ॥ ४६
त्रिशंकुना पुनर्गत्वा हत्वा च विसुतानथ ॥ ततः क्रोधेन संत्रासस्त्रिशंकुः शक्तिना बलात् ॥ ४७
ब्रह्महन्राक्षसीं योनिं याहि हि विघ्नांतको स्तु च ॥ इति शापं च संगृह्य भूयो यज्ञमुपस्थितः ॥ ४८
विश्वामित्रमुने परस्य शक्तिना शापितोस्म्यहं ॥ दारुणं शापमाशाय च्छयामि शरणं मुने ॥ ४९
विश्वामित्र उ० गच्छ शक्तिं भक्षयस्व ततः शुद्धो भविष्यसि ॥ यज्ञांतावभृथस्नानानंतरं कार्यो विचा
रणा ॥ ५० ॥ नारद उ० इत्याकर्ण्य गतो रक्षः शक्तिं भक्षितवान्मुनेः ॥ आगता यागसदनं विश्वामित्रेण स ९५
त्कृतः ॥ ५१ ॥ यागं समाप्याभ्यषिंच्य यज्ञांतावभृथोदकैः ॥ शुद्धः कृतो नृपः शापात्स्व[illegible]य
योजितः ॥ ५२ ॥ तस्मान्नतोय संभूता धर्मनाशा सरित्तता सकर्मनाशिनी स्पर्शात्कर्मनाश[illegible]घ
ति ॥ ५३ ॥ तं वृत्तांतं वसिष्ठोपि श्रुत्वा दुःखं चकार ह ॥ कोपेन स्वर्गमार्गस्थस्त्रिशंकुं स्थगितश्च खे ॥ ५४

विघ्नं कृत्वा त्रिशंकोः क्रोधश्च तीर्थयात्रां जगाम सः ॥ नानातीर्थान्पुण्यजलान्दृष्ट्वा विंध्याचलं नगं ॥ ५५
उदुंबरं महातीर्थं वसिष्ठः प्राप्तवान्मुनिः ॥ अत्रोदुंबरतीर्थे च स्नात्वा विधिविधानतः ॥ ५६
श्वेतवाराह देवाग्रे तपस्तेपे सुदारुणं ॥ एवं वर्षशतं यातं ततो भूद्वरदो मुनिः ॥ ५७ ॥ को
लरूपधरः श्वेतः प्रत्यक्षो व्यक्तया गिरा ॥ वाराहरूपधृग्विष्णुर्ददौ वरमनुत्तमं ॥ ५८
वसिष्ठाय मुनींद्राय ब्रह्मज्ञाय महात्मने ॥ वराह उ० उत्तिष्ठ मुनिशार्दूल वरं वरय सुव्रत ॥ ५९
यत्ते स्वांते त्वभीप्सार्थं तव दास्यामि शाश्वतं ॥ वसिष्ठ उ० नमः कमलनाभाय वराहाय च च
क्रिणे ॥ ६० ॥ आदि आदि रूपाय सिंधो सर्वस्मै ते नमो नमः ॥ व्यापकाय परेशाय सर्वती
र्थात्मने नमः ॥ ६१ ॥ सर्ववेदात्मने सर्वप्रकृतिय त्रस्वरूपिणे ॥ देवदेव जगन्नाथ मत्कानु
ग्रहकारक ॥ ६२ ॥ विष्णवे ते चतुर्बाहो नतोस्म्यहमथापर ॥ नमस्ते विश्वरूपाय नम
स्ते वरदायिने ॥ ६३ ॥ नमोनंतस्वरूपाय सर्वगाय नमो नमः ॥ नमस्त्रिमूर्तिरूपाय नमो
ब्रह्मांडधारिणे ॥ ६४ ॥ नमस्त्रैलोक्यपालाय नमो भक्तार्तिहारिणे ॥ नमः स्थूलाय सू
क्ष्माय परात्परतराय च ॥ ६५ ॥ नमः पार्थिवरूपाय व्याप्यरूपाय तेजसे ॥

नमोवायुस्वरूपायव्योमरूपायतेनमः ॥ ६६ ॥ येवसो वेयेकग्रहस्थायुग्माकिरूपायविसवे अनादिरूपरूपायनादविंदुकलात्मने ॥ ६७ ॥ ज्योतिरूपायविश्वस्मै नमोमोहपहारिणे अ ज्ञानध्वानरूपायकरुणामृतवारिधे ६८ कैवल्यामृतरूपायनमः क्षीराब्धिशायिने कोटितीर्थैकपादायकोटितीर्थांबुधारिणे ६९ ब्रह्मांडस्थानद्रष्टाय विश्वसंस्थानहेतवे दंष्ट्राकृतिधरायश्च लक्ष्मीनाथायतेनमः ७० कोटिसूर्यप्रभांगायवाराहायपरात्मने भूमिभारापहारायवाराहायनमोनमः ७१ नारदउ० वसिष्ठमुनिनेत्येवं संस्तुतःपरमेश्वरः ओंवाचकरुणांविष्णुर्वाराहवदनोमुदा ७२ गलज्जिह्वांबुसंभूतवाहिन्यामृतधारया वरंवरयशीघ्रंहि दास्यामिमुनिसत्तम ७३ वसिष्ठउवाच देवाधिदेववाराहरूपासिंधोजनार्दन अनघामस्तुतोदेवभक्त्यास्तुःक्षिप्रमुच्यतां ७४ देहिसायुज्यतामेषां प्रार्थयामीतिकेशव वाराहोवाच इतंतवेप्सितंब्रह्मपुत्रास्तेसंतुपावनाः ७५ मन्मुखाग्निर्गतापुण्याजिह्वालोलांबुपावनी तटिनीवरदाचेयंसर्वतीर्थाधिदेवता ७६ सारस्वतंतुतत्तोयंमयातीर्थेत्रगोपितं तत्र पश्यमहत्पुण्यंमज्जिह्वोत्थंतपोनिधे ७७ सारंसारस्वतंतोयंतत्रयस्त्वदिह्मक्षितः

परतोब्रह्मकूपांताद्वाहिनीसाभविष्यती ७८ महारुद्रवतीदेवीसर्वतीर्थांबुवाहिनी त त्तटेयज्ञयागंहितत्तःसिद्धिंसमाहितां ७९ यज्ञांतेविधिनातत्रस्नात्वयात्रात्मसोदकैः मिलिष्यतिचतत्कूपेसारस्वतमिदंजलं ८० ब्रह्मकूपोच्छलत्तोयंकल्लोलांबुप्रवाहतः वाहिनीवरदासेयंनदीवासिष्ठगौतमी ८१ भविष्यतिनसंदेहः सर्वपापौघनाशिनी सर्वसिद्धिप्रदात्रीचसर्ववर्गफलप्रदा ८२ संस्मृतावंदितापीताविष्णुलोकंनयेन्नरं नारदउ० ततःप्रभृतिवासिष्ठीगीयतेभूमिमंडले ८३ अन्यच्चापिचमाहात्म्यंतटिन्याऋषिसत्तम शृण्वंतुसावधानाश्चपुरावृत्तंकुतूहलं ८४ तीर्थक्रमविधानेनयेयेसिद्धिंगताजनाः तेषांपुण्यफलोद्भूतंमाहात्म्यंतीर्थजंतथा ८५ आद्यमौदुंबरंतीर्थंब्रह्मकूपमतःपरं व रदाश्वाभिधंतीर्थंचक्रतीर्थमतःपरं ८६ माहेन्द्रंवारुणंतीर्थंलिंगतीर्थंस्थयेवच मृगीवटाश्रमंचैवदेवालयमहाह्रदं ८७ देवथुंछतथतीर्थंचमानदंचमहोरसं वेधातीर्थंमाहाख्यातंयत्रप्राचीविदिङ्मुखा ८८ अंबरीषाश्रमश्चैवजंबुकासंगमस्तथा सोमतीर्थंतुनोरव्यातंमाहेन्द्रीपापनाशिनी ८९ ऋणत्रयहरंचैवभवरखेटरुद्रंवधात्

अंबुलिंदपक्षितीर्थंचचरुडाल्लासंगमस्तथा ९० औद्दालकंपंचखंडाख्यंतातोक्षय्यवटंतथा
विल्वतीर्थमनंताथंलक्ष्मीतीर्थंततःपरं ९१ पारदंतीर्थराजाख्यंयोगिनीतीर्थवाहुकं
फल्गुस्त्रीराग्णेशाख्यंकामतीर्थंचकामदं ९२ उर्वशीसिद्धिदंतीर्थपापमोचनमेवच
ऋणमोचनमांडव्यस्याश्रमःकुंडिनंतथा ९३ पंचतीर्थंप्रयागाख्यंकापर्दंगारुडंतथा
कापिलंगोकुलंतीर्थगुंजखेटंततःपरं ९४ ततःक्रौंचाभिधंतीर्थधन्वंतरिमखाभिधं
अलिरंचमहातीर्थंनारकेश्वरसेवितं ९५ ततोवेदवतीतीर्थंप्रणीतासंगमंततः
गव्हरतिमात्रंतीर्थानिसंख्यैस्त्रिशतीसमं ९६ तेषांस्नानभवंपुण्यंविस्तुतोकोभिदंतथा
ऋषयऊ॰ कतंतीर्थक्रमंसर्वंप्रणीतासंगमावधि ९७ केचनत्रविमुक्ताश्चपापैःकिंफलभागिनः
नारदउ॰ विंध्यस्यदक्षिणेभागेवरदायास्तटेशुभे ९८ वसिष्ठेनकृतोयागःसर्वकामार्थसिद्धये
माहात्म्यंचलत्रास्तेवसिष्ठावभृथोदकं ९९ मीलितंतत्रलिंगंचयज्ञेश्वरइतिस्मृतं
संतितत्रमहालिंगान्यष्टौतानियथाक्रमं १०० यज्ञेश्वरस्ततःप्राच्यांमहेशोहाटकेश्वरः
नागेश्वरोयचंद्रेशोकलिकालभयापहः १०१ श्लेशोयज्ञरूपेशोद्दत्तशिवमूर्तयः

दर्शनान्मुच्यतेजंतुर्जन्मजाताद्दणत्रयात् १०२ तत्ररुद्रेचयःस्नातःसर्वपापैःप्रमुच्यते
नपुनर्जन्मभाग्जंतुर्यत्रकुत्रमृतोपिवा १०३ ततोस्यपश्चिमेभागेतीर्थमंबरिषाश्रमः
महत्पुण्यप्रदंचैवस्नानादघविमुक्तिदं १०४ यत्रैवांबरिषोलेभेसायुज्यंतपसापरं
जंबुकासंगमेतीर्थत्र्यंबकनाथेश्वरालिके १०५ ततसौम्यचकारासौवर्षाणांचशतंततः
प्रसन्नोभूच्छिवस्तत्रशैलजासहितोमुदा ६ वरंतस्मैददौदेवस्तीर्थस्यास्यप्रशंसया
प्रयागात्रिगुणंतीर्थंरवौमाघेचमाकरे १०७ स्नानमात्रेणनिःपापोनरोयलपदंव्रजेत्
इतितत्रवरंदत्वासंगमेंतर्हि तःशिवः ८ संगमेश्वरलिंगंचसंस्थाप्यांबरिषणच
शैलजांचततोगौरीमंतर्वेधांप्रपूजयत् १०९ कियत्कालंचतत्रसौस्थितामःसोमाधेयाः
रकः ददर्शशैलजांगौरींकंठलग्नांपरांबिकां ११० ततःसोंबरिषोदेवंगौर्यासहितमानमत्
दंडवत्सतितोभूमौपादयोर्नंस्पृशन्मुदा ११ अंबरीषउवाच गौरीशशंकरसदाशि
ववामदेवमांपाहिपाहिकरुणाकरचंद्रचूड सर्वार्थदप्रणतसिद्धिददेवदेवगंगाधर
प्रणमनेममदेहिसिद्धिं ११२ आतंकदोषरहितंत्रिजगत्समस्तंनीतंत्वयात्रिपुरमंथक

१८

मानिहत्य देवांगनाभिरभितं विजयाभिषेकैर्नीराजितोसि नितरां मुनिभिः संस्तुतोसि १३
मंदारपुष्पमकरंदमिलत्किरीटगंगातरंगलसदिंदुकलां दधासि भालस्थलेत
रलतारविभूतिभस्मांधस्ते किमेष मम वाग्विभवो मुदे ते १४ येन त्वया सुरकुलेस
कलं विनश्य देवान्स्वनाकसदनं प्रमुदा विनीय त्रैलोक्यमुन्नतिमुदारधियान्वि
तायतस्मै नमोस्तु सततं गिरिजाप्रियाय १५ दोषण दक्षकृतयागफलप्रशांति
हेताथतन्निधनकारणवीरभद्र येन त्वया प्रकटितं हि जटालिमालात्तस्मै नमोस्तु
सततं गिरिजाप्रियाय १६ नमस्ते सोमपालाय नमस्ते त्रिपुरारये गंगाकेलिकि
रीटाय शंभवे विभवे नमः १७ नारद उवाच इति च स्तुत्वा महादेवं भक्त्या चांबरि
षेण च लब्धं वरं यथेष्टं च स्तुत्या संतुष्टः शंकरात् १८ ईश्वर उवाच अंबरीष प्रस
न्नोहं भक्त्या परमया नया वसामि तीर्थवर्येस्मिं प्राणिनां दुःखमुक्तये १९ यः पु
मान्स्वकृत स्तुत्या मां स्तौति यश्च नित्यशः भक्त्या सोमदिने सम्यक् श्रावणे सिंहगे रवौ २०

१८

संप्राप्नोति क्षितौ सर्वान्कामान्प्रांते मदंतिके यो त्र सोमदिने मायां पूर्णायां वा समाहितः २१
स्नात्वा मां वीक्षते सोपि मम प्रियः सततं भवेत् तस्य दास्यामि कैलासे निवासं भागसंयुतं २२
भुक्त्वा भोगान्स्थितो दीर्घकालं प्रांते सलोकतां अस्तु षण्मुखजा गौरी देवी सर्वार्थदायिनी २३
महापापौघशमनं सोमतीर्थं तथास्त्विति नारद उवाच तदादि सोमतीर्थं च वरदातीरसं
स्थितं २४ विख्यातं पुण्यदं चाभूत्सोमतीर्थं च शैलजा सर्वतीर्थप्रदा भूमौ लोकानां पुण्य
सिद्धये २५ इति श्रीब्रह्मांडपुराणे विंध्याद्रिखंडे वरदामाहात्म्ये तीर्थप्रशंसनं नाम सप्तमो
ध्यायः ७ ऋषय ऊचुः श्रुतं नारद यत्नेन सोमतीर्थस्य वर्णनं तत्कथं मुक्तिदं पुंसां कस्मि
केषां च तद्ब्रूहि १ नारद उवाच श्रोतव्यं सावधानैश्च भवद्भिर्भक्तिभावनैः यदुक्तं ब्रह्म
णा पूर्वं तीर्थयात्राफलान्वये २ प्रयागादधिकारे वा भृगुतीर्थं प्रशंसिता तस्माद्दश
गुणा प्रोक्ता वरदा ब्रह्मतीर्थगा ३ कार्त्तिके श्रावणे चैव सोमतीर्थं प्रकीर्तितं स्नानमात्रे
ण तुल्यं स्यात्काश्यां पंचनदेन च ४ माहेन्द्रं ब्रह्मतीर्थं च दुर्गातीर्थं चनंतकं कुंडिनं परमं
तीर्थं कुशावर्त्ताधिकं स्मृतं ५ विदर्भासंगमः पुण्यो गंगासागरतोधिकः कालेभ्वश्च यत्रे

२

१८

शास्तारकेश्वर एव च ६ विश्वेश्वरसमाप्रोक्ता दर्शनान्मुक्तिदा नृणां वरदा वंजरा वैन्या प्रणीता गोतमी तथा ७ पंचनद्यः स्मृतास्ताश्च प्रयागात्कोटिशोधिकाः नर्मदायां कलिकालस्य नश्यंति यमदूततः ८ दृष्ट्वा कालेश्वरं मर्त्यो नाकमारोहति ध्रुवं ब्रह्मतीर्थं वराहाख्यं यात्र तु पंचसंगमे ९ सायुज्यं लभते मर्त्यो निश्चयेन शिवाज्ञया वरदातटमासाद्य यो नरो नियतं व्रजेत् ९ क्षिप्रं विमानमारुह्य स याति हि सुरालयं अन्यदेकं च यज्जातं हि तीर्थं वैकथानकं १० तदर्थं श्रूयतां भक्त्या सर्वपापभयापहं आस्ते विमुक्तिदं तीर्थं विंध्याचलसमाश्रितं ११ माहेंद्रं नाम शिखरं लिंगेशाधिष्ठितं परं तदहं वर्णयाम्याशु पापघ्नं श्रवणेन तु १२ विंध्यस्य दक्षिणे भागे महाचलसमीपगं वरदातीरसंशोभितीर्थमिंद्रजयप्रदं १३ विघ्नतेसर्वपापघ्नं दर्शनान्मुक्तिदं नृणां ऋषय ऊचुः हे नारद मुनिश्रेष्ठ लिंगेशाख्यस्य का कथा १४ कथयस्वेंद्रप्रवीणां जयदं च कथं भवेत् नारद उवाच पुरा देवासुरा आसन्स्वर्गे त्वेकापरा पितः १५ एकाकी द्रष्टितोतत्र माहेंद्रं शिखरं गतः यत्राभिलक्ष्यरूपं च चापबाणधरं लघु १६ गुप्तरूपेण वने तत्र तिरोहिततनुः सदा

निवसन्कानने शाक्रो लिंगमेकं ददर्श ह १७ वरदाजलमाप्लुत्य तल्लिंगं पूजयेन्मुदा इंद्रोनित्यं वसन्नासीत्कियत्कालांतरे स्थितः १८ तत्रैकः शिवसान्निध्ये चागतः समृगीमृगः आराच्छनैः शनैः पश्यन्भक्षयन्कोमलांकुरान् १९ मृगं दृष्ट्वा बलाराति श्चापमादाय मार्गणं गुणे योजयितुं यावत् तावन्निर्मलया गिरा २० मृगः प्रोवाच वचनं मा मा मां मारय प्रभो इदमायतनं लिंगं निर्वैरे याभजस्व हि २१ क्षिप्रमालभ्यते भीष्टं जयं प्राप्स्यसि शंकरात् इत्याकर्ण्य मृगीवाचं शक्रस्तस्थौ स विस्मितः २२ प्रत्युवाच मृगं कस्त्वं किमेतं लिंगमेणया मृग उवाच गंधर्वोत्तरण्यत्र नवशापवशात्प्रभो २३ विचरामि यथाकालं लिंगेशासरितावने वरदातायमासाद्य लिंगेशं वीक्ष्य कानन २४ इतस्ततो यथा स्वैरं तृणं कवलयन्मुदा शापांतो मे कदा भूयादिति संचिंतयन्नहं २५ सपत्नीको दिवारात्रौ विचरामि शचीपते इंद्र उवाच मत्तः शापं कथं प्राप्तो गंधर्व केन हेतुना २६ तत्सर्वं कथयेणाथ मां च भो तुकमानसं मृग उवाच त्वया बलवधार्थाय शिवपूजा हिता यदा २७ तदा पूज्योपहारांश्च मृगी यत्र तवांतिके स्थापितान्वीक्ष्य पुष्पादीन्म्लानानि किमितिक्रुधा २८ त्वं समां निंदयामास किमर्थं त्वविलंबनात्

म्लानपुष्पचयं दृष्ट्वा तूष्णीं तिष्ठसि पापधीः २९ मयोक्तं तत्र सा तं कं स्वामिन्मृगगणो वने
मिथो युध्यमयाध्वानं रोधयन्नत्र संस्थितः ३० तत्र कालविलंबो मे जातस्तस्मात्क्षम्यतां प्रभो
त्वया तथापि शप्ताहं सपत्नीको मृगो भव ३१ तस्मिन्नेव वने घोरे विचरस्व सितावितिं
मया संप्रार्थ्य शापांतेः कदा मे भविता प्रभो ३२ त्वयोक्तं मां च दृष्ट्वा ते शापांतो हि भविष्यति
तेनाहं भावयेसापापाच्छापांतश्च चागतः ३३ त्वदीयाद्दर्शनाद्देव जातोस्तंगतकिल्बिषः
अस्य लिंगेश्वरस्याग्रे शंकरानुग्रहेण च ३४ मृगदेहं परित्यज्य गंधर्वीं तनुमाश्रये नारद उ०
इत्युक्त्वा स मृगो देहं लिंगस्याग्रतमे त्यजत् ३५ गंधर्वरूपमासाद्य शक्रस्यानुचरो बभौ ऋषय ऊ०
देवर्षे प्रोक्तमेतन्नः परं कौतूहलं त्वया ३६ किमप्येजातमिं इत्यस्य शिवलिंगार्चनात्फलं नारद उ०
ततश्चंद्रः सगंधर्वः स्वत्रलिंगार्चने रतः ३७ एतस्मिन्नंतरे सा च मृगी युवाच सगद्गदं
हे नाथाद्य कयातोसि देहं त्यक्त्वा च मां विना ३८ किं करोमि क गच्छामि विना प्राणेश्वरं पतिं
अहोस्मिन्कानने घोरे व्याघ्रसिंहादिसेविते ३९ कथं मे काकिनी बाला जीवामि भवतोझिता ।
इति सा करुणं प्रोच्चैः रुदती शिवसंनिधौ ४० हाहाकारेण गात्राक्रंतं भीषयामास तत्क्षणे

भयात्प्राणान्मुमोचैषा गंधर्वत्वं तनुमाययौ ४१ स्वपतिं प्रापयामास शक्रस्यानुचरेण सा
एतस्मिन्नंतरे तत्र कश्चिदुज्जयिनीपुरात् ४२ देवशर्मा द्विजोभ्यागाच्छांतो दांतोथ धार्मिकः ।
तीर्थयात्रापरस्तत्र लिंगेशो भक्तिसंयुतः ४३ देवायतनमालोक्य वरस्तावारि संप्लुतः
देवपूजार्थमायातस्तावद्दृष्ट्वा मृगीमृतो ४४ अहोः किं जातमत्रेति मृगमीक्ष्य मीश्वरे यत्नं
मरणमव्यग्रमक्षतां पश्यतां जनाः ४५ इत्युक्त्वा शंकरं पूज्य भक्त्या व्याकुलतां गतः
मृगांतिकं वृतावच्च विमानं देवलोकतः ४६ आगतं दिव्यवादित्रदिव्यध्वनिसमन्वितं
सार्द्धं शिवगणैस्ताकं विमानमधिरोहितौ ४७ शिवलोकपदं नीतौ तौ तं दृष्ट्वा स द्विजोभ्यगात्
विस्मयं तत्र तीर्थे सो देवशर्मा स्थितिं दधौ ४८ अहो प्राप्तं मया तीर्थं परमं मुक्तिदं महत्
अत्रैव निवसाम्येवं मुक्तये स्मिन्छिवालये ४९ इति निश्चित्य तत्तीर्थे देवशर्मा करोत्स्थितिं ।
नित्यं जपपरो विप्रस्त्रिकालं हि शिवार्चनं ५० विदधत्स्फलपर्णाशी गीतस्तोत्रपरायणः
एवं संवत्सरे पूर्णे कार्त्तिक्यां तत्र शंकरः ५१ तुतोष परया भक्त्या वरं तस्मै वरं ददौ शंक
र उ० विप्रश्रेष्ठ तुष्टोस्मि वरं याचय वेगतः ५२ संवत्सरं कृता पूजा ह्यनेन त्वया सत्व देवशर्मोवाच

२३

यदि तुष्टोसि मे देव देहि भक्तिमचंचलां ५३ निजपादाब्जमनिशं हृदि मे धारय प्रभो
शिवे भक्तिः सदा भूयाच्छिवसंकल्पमस्तु मे ५४ शिवे स्तु मन्मनो नित्यं यावदाचंद्रतारकं शिव उ॰
शिवभक्तिः सदास्तु न हि मे तेंतरं सदा ५५ याहि श्रीशैले शिखरं तत्र सायुज्यमाप्स्यसि ।
ततः संकल्पमाधाय निर्गतो सि जलाशयात् ५६ पूर्णतां यातु संकल्पो मम सुरं पश्यत तत्र च
इति लिंगेश्वरो पांते वरं लब्ध्वा द्विजोत्तमः ५७ देवशर्मा प्रणम्येशं निर्गंतुं तं परिक्रमे
तावदिंद्रः सगंधर्वः प्रोवाच द्विजपुंगवं ५८ देवशर्मन् द्विजेंद्र त्वं क्षणं तिष्ठ मयोदितं देवश
र्मोवाच कोसि त्वं किं तवाभीष्टं कोयं तव सखा नरः ५९ न च मे शिवभक्तस्य निःसंदिग्धं शिवालये ।
इंद्र उ॰ इंद्रोहं वृत्रसंत्रासादागतो गुप्तकानने ६० अत्र माहेंद्रशिखरे स्थीयते गोपयन्तनुं गंध
र्वानुचरो यं मे यो सौ दृष्टो मृगोत्तमः ६१ स भार्यो मुक्तशापोत्र जातो लिंगेश्वरालये देवशर्मोवा॰
अहो स्म मानुषः किंचित्त्वं देवेंद्रासि नायकः ६२ कथं प्रष्टुमहं योग्यः शंकरं किं न पृच्छसि इंद्र   २१
उवाच देवशर्मन्नृशाचीशाश्चंगतं कालवशान्मम ६३ ईशोपि विमुखो भातिनाको विश्लेषि
तोधुना कर्मभूर्मिं विना कर्मफलदं नाकवासिनां ६४ नातो देवा हि वांछंति भद्रदेवत्वं कुमारिके

त्वं सदा तीर्थवासेन सत्कर्माचरणेन च ६५ ईश्वरानुगृहीतोसि तस्मात्त्वमोत्तरोत्तमान् देव
शर्मोवाच साधु शंभुं समाराध्य यत्र काले भीप्सितं फलदा ६६ इतीद्रश्चावदे देवं द्विषां मितवाज्ञया नारद उ॰
इतींद्रो प्रेषितो विप्रः पुनर्लिंगेश्वरं ययौ ६७ आराध्य परया भक्त्या लिंगेशं प्रस्तुवाच ह देवशर्मो
वाच श्रीदेवदेव शशिशेखर भक्तनाथ शंभो क्षमस्व पुनरागमनापराधं त्वद्दर्शनादुपकृतिर्म
मनो न विचित्री तस्मादहं सुकृतभागिति मेभिलाषः ६८ क्षमध्वं भो क्षमध्वं भो चंचलत्वानुचरस्य च
अपराधसहस्रं हि प्रसन्नोसि यदि प्रभो ६९ त्वयोपदिष्टधर्मेषु परोपकरणं चयत् सर्वध
र्मोत्तरः श्रेयान् कारणं च सतां मतं ७० तस्मादहं पुनः प्रष्टुमागतः करुणाकर ७१ शा
तं प्रश्नं सुरेंद्रस्य वृत्राद्विजयमिच्छतः ७१ तस्यार्थमीप्सितं चास्ति दधीचेर्वरतो द्विज ७२
नारद उ॰ इति श्रुत्वा वरं शंभोरिंद्रोपि प्रणतिं गतः नतिभिः स्तुतिभिर्भूयो भूयः प्रणतिमाच्छिव ७३
शिवं संपूज्य भक्त्या चेनत्वा स्तुत्वा पुनः पुनः परिक्रम्याज्ञया युक्तो निर्यातो तो शिवालयात् ७४
ततइंद्रो द्विजेंद्रस्य पृष्ठस्थौ तदैवेक्षणात् आराद्दधीचिनामानं मुनिं पृष्टस्य सिद्धये ७५
देवशर्मा शचीशस्य वृत्तं विस्मयकारणं विमृश्य क्रमयामास श्रीशैलाख्यं तसद्रुमं ७६ नारद उ॰
इत्याख्यानं पगे यः श्रृणोति श्रद्धयान्वितः सर्वपापविनिर्मुक्तो लभेत्तत्सर मं पदं ७७ इति श्रीब्रह्मो॰ वि॰ व॰ क॰
...लिंगेश्वरमाहात्म्यं नाम... ॥

ऋषय ऊचुः॥ भो नारद महाभाग वयं त्वत्तः कृतार्थतां । प्राप्ता अपि पुनः श्रोतुं वरदाख्यानमुत्सुकाः ॥ १
नारद उ० शृणुध्वं मुनयः सर्वे बिल्वतीर्थस्य वर्णनं । यस्यालोकनतः क्षिप्रं श्येनः सद्गतिमाप्तवान् ॥ २
कश्चिद्दासीत्पुरा विंध्ये पापग्रस्तो विहंगमः । कपोतो वनचारी च स सत्वदाश्रमवीक्षतः ॥ ३
विचरन्नेकदा काले स गतो वरदातटे । तत्रैको बिल्ववृक्षोस्ति तन्मूलेस्ति शिवालयं ॥ ४
विप्रस्तत्र समासीनः शिवपूजापरायणः । सोपहारस्तदा काले श्येनो गगनमंडले ॥ ५
भ्रमन्निरामिषो वेगात्कांक्षितस्तं पपात ह । कपोतं बिल्वमारूढं संस स्कंपावलंबितः ॥ ६
शकुनिर्निर्ययो भीत्या निकटं कोटरांतरे । प्रविवेश भयत्रासान्मूर्छापन्नोभवत्तदा ॥ ७
कोटरांतर्गतः सर्पस्तं दृष्ट्वाथ समागतः । हर्षितो घ्रमयाल्लाभो निरायासादुपस्थितः ॥ ८
इति चिंत्य बिलद्वारे श्येनचंचुर्विलोकिता । अहो किमेतदुत्पातः समारब्धो महद्रिपोः ॥ ९
कुतः समागतो वैरी सन्नद्धश्चंचुमुद्यतः । किमामिषेप्सया लब्धेनारिपो बिलमुखे स्थिते ॥ १०
इति व्यग्रतया सर्पस्तस्थौ तत्रैव कोटरे । एतस्मिन्नंतरे श्येनः शिवपूजामपश्यत ॥ ११
ब्राह्मणेन कृतां भक्त्या नानाभोक्तुंभक्ष्यविवेभो । पूजाविलोकनाच्छ्येनो निष्पापस्तत्क्षणादभूत् ॥ १२

किं मयाजीवविध्वंसप्रयासोऽत्र विधीयते । शिवपूजोपहारोयं कथं न स्वाद्यते प्रियः ॥ १३
इति चिंत्य समुत्तीर्य बिल्वाधः स्वं शिवांतिकं । पूजां चखाद मिष्टान्नं यथेष्टं च जलं पपौ ॥ १४
तत उन्मील्य नेत्रे स ब्राह्मणः श्येनमीक्ष्य च । सहितो ज्ञानवान्विप्रः कोसि त्वमित्यभाषत ॥ १५
हसितो ज्ञानवान्विप्रः गते श्येने बिलद्वाराद्बहिः सर्पो विनिर्गतः । कोटरात्समयं प्राप्य कपोतोपि पलायितः ॥ १६
पश्यन्दूरे बहिः श्येनं स्वां तनुं गोपयन्तरौ । ऋषयः सावधानेन श्रोतव्यं तत्कथानकं ॥ १७
संवादे विप्रश्येनस्य पक्षिणाश्वसमंजसा । ऋषय ऊचुः॥ वद नारद तत्त्वेन तत्संवादं श्येनपक्षिणोः ॥ १८
उद्यतास्मो वयं सर्पकपोतारिष्टनिर्वृतिं । नारद उ० तीर्थमाहात्म्यसामर्थ्याच्चिद्वृत्तिं श्येनमानसे ॥ १९
कपोतस्य च सर्पस्य सर्वारिष्टं लयं गतं । श्येनो मधुरया वाचा विप्रं प्रोवाच चाद्भुतं ॥ २०
श्येन उ० विप्राहो किमिदं चित्रं शिवलिंगस्य पूजनं । यत्कृतं तत्त्वमाख्याहि कः शिवायं च चापगा ॥ २१
कस्त्वं किंनाम ते स्वामिंस्त्वं सर्वं मे निगद्यतां । विप्र उ० अहो तीर्थस्य माहात्म्यादस्य त्वं श्येनरूपधृक् ॥ २२
प्राप्तोसि मानुषं वाचं वक्तुं निर्मलया गिरा । मनः शुद्ध्यखिलं कर्म तीर्थयात्रादिकं परं ॥ २३
क्रीयते सद्भिरित्यस्मात्तच्छ्रुत्वास्यमलं मनसं । कुत आगत्य संप्राप्तो तीर्थराजपरं खग ॥ २४

२३

श्येनउवाच पूर्वं शापांतमासाद्य सप्तमे लिंगसंनिधौ । श्रमन्नाकाशमार्गेण क्षुधार्तो ह्यामिषप्रियः २५
कपोतं बिल्वमारूढं प्राप्तोस्मि लिप्सया गतः । कपोतः कोटरं यातो मे प्रयासो निरर्थकः २६
अस्मिन्नदा शिवार्चायां तत्कृता प्रविलोक्य च । इहागतः क्षुधार्तोहं लब्ध्वांतर सुखं गतः २७
जातोहं विगताधीश्च ज्ञानवांश्च प्रसादतः । तत्सर्वं कथय विप्र ज्ञानवानस्मि कारणं २८
ब्राह्मणोवाच अयं बिल्वेश्वरो देवो स्थापितोंगिरसा पुरा । दैत्योपद्रुतदेवानां रक्षणाय हिताय च २९
पूजितोंगिरसा सोयं देवानां विजयाय वै । गुरवे सुरपूज्याय प्रसन्नोभूत्सदाशिवः ३० शिवउ०
सुप्रीतोहं सुरगुरो तव वेश्यं यद्दास्मि तत् । त्वया स्थापितलिंगेस्मिन्नधिष्ठानं करोम्यहं ३१
मम तल्लिंगमालोक्य देवानां मानुषो पि वा । जयं प्राप्नोति सर्वत्र सर्वारिष्टपरिच्युतः ३२
अस्यामावीक्षते स्तोति स याति परमां गतिं । भुक्त्वात्र विविधान्भोगानंते याति ममांतिकं ३३
इति लिंगस्य माहात्म्यं शृणु श्येन जयप्रदं । चित्तशुद्धिकरं नृणां जंतूनां परमार्तिहृत् ३४ नार
दउवाच एवं बिल्वेश्वराख्यानं वरदातीर्थसंभवं । श्रुत्वा विप्रमुखात् श्येनः शिवध्यानपरोभवत् ३५
क्षणं ध्यात्वाथ बिल्वेशं नत्वा स्तुत्वा प्रसादयत् । श्येनउ० उमेशाप्राणसूत्राहि जयं देहि मम प्रार्थिनः ३६ २३
ममास्तु निर्मला बुद्धिः सदा भक्तिः शिवेस्तु मे । नारदउ० इति बिल्वेश्वरो देवो वरदातीरसंस्थितः ३७

प्रसादीकृत्य देवानां नाकं प्रापयदंगिराः । ऋषयउ० श्रुतं बिल्वेश्वराख्यानं मुने सर्वार्थदं नृणां ३८
द्विजोपदिष्टमेरुंडः किं फलं च ततो लभेत् । बिल्वेशं च समाराध्य न्ययेनः सन्मतिभावतः ३९
पुनः प्रोवाच तं विप्रो स्वकर्म प्राक्तनं स्मरेत् । श्येनउवाच श्येनत्वं कथमापन्नो विप्रेंद्र रूपवान् ४०
कोहं च कर्मणा केन निःसंदिग्धं कुरु प्रभो । कथं विमुक्ततां यामि तत्सर्वं घप्यायोच्यतां ४१
विप्रउ० शृणु श्येन पुरा त्वं च परपैशुन्यवाचकः । स्वयं कृत्वा परेषां च परद्रव्यप्रलंभकः ४२ तत्क
र्मवशात् श्येनयोनिं प्राप्तोसि किल्बिषी । त्वया विचिंत्या बिल्वेशं नत्वा स्तुत्वा प्रसादयन् ४३
विप्रउ० श्येनैवं तीर्थमासाद्य शापांतो भविताधते । तीर्थे शिवं च संप्राप्य निर्दोषत्वं गतोस्यतः ४४
श्येनउ० विप्र दुर्योनिमासाद्य कथं पुण्यस्य भाजनं । जातोहं भारते वर्षे सतां कर्मफलार्दितां ४५
मम संशयविच्छेदं कुरु भोस्त्वनुकंपया । कर्मणः सूक्ष्ममार्गेण यतो वक्तासि सुव्रत ४६ विप्रउ०
दर्शनात्स्पर्शनादेव संगत्या भाषणेन च । तीर्थयात्रा शतांशं च लभंते सर्ववर्जितकैः ४७
यथा काशीं गतः प्राणी नानायोनि समागतः । निःपापो जायते सद्यो दर्शनान्नात्र संशयः ४८
कीटाश्चैव पतंगाश्च विहंगा अपि मानुषाः । दर्शनात्स्पर्शनाद्येव जायते गतकिल्बिषाः ४९
देहांते परमां मुक्तिं लभंते नात्र संशयः । यथा त्वं दर्शनाज्जातो बिल्वेशस्य च पुण्यवान् ५०

२४

यतोयं पूजितव्यो हि देवः सर्वार्थसिद्धिदः काशीप्राप्तकरो वश्यं दर्शनादेव खेचर ५१
जन्मांतरगतैः पुण्यैरिहागमनकारणं जायते सर्वजंतूनां निर्वाणपदलब्धिकृत् ५२
नहि निर्वाणपदवी तीर्थयात्रां विना खग लभंते मानवा भूमौ भारते त्रिविशुद्धिमान् ५३
विशेषान्मानुषं देहं कर्मी हं कथितं बुधैः मनसा कर्मणा वाचा फलदं हि च यत्कृते ५४
नारद उ० इति विप्रोक्तिमाकर्ण्य श्येनोपि वरशातरं बिल्वेश्वरं समाश्रित्य देहांतं कर्तुमुद्यतः ५५
ब्राह्मणोपि ततः काशीप्रस्थितस्तत्प्रभावतः कपोतोपि भुजंगोपि निर्वैरेणाकरोस्थितिं ५६
तत्र तीर्थे चरन्नाराः सश्येनपि परस्परं तीर्थवासप्रभावेन जातः शुद्धांतरात्मना ५७
इति कालांतरेणैव करको सातसंहते तत्र तीर्थे च देहांतं त्रयः प्रापुः स्व्यास्समं ५८
व्योमयानं समारुह्य सुरराजपुरं गताः स्वर्गभोगावसाने ते भूमौ भूत्वा समागताः ५९
श्येनराजोथ कापोतो नागराजस्तथैव च परितः काशिकादेशो काशीराजस्य सेवकाः ६०
बभूवुस्ते च धर्मेण देहांते काशिकापुरे समासाद्यापि निर्वाणं प्राप्तास्तेपि महाव्रताः ६१
इति श्रीब्रह्मांडपुराणे विंध्याद्रिखंडे वरदामाहात्म्ये बिल्वेश्वराख्यानं नाम नवमोध्यायः ९ छ नारद उवाच

२४

श्रीबिल्वेशस्य माहात्म्यं यः शृणोति च भक्तितः अपमृत्युं विनश्येत काशीयात्राफलं लभेत् १
शृणुयाच्छ्रावयेद्वापि स याति परमां गतिं नारद उ० अन्यच्चैकं परं तीर्थं वरदातीरसंस्थितं २
विद्यते तस्य माहात्म्यं मुनयः श्रूयतां महत् मुनय उ० साधु साधु महर्षे त्वं कृपावानसि सत्यधीः ३
अस्माकं श्रावयस्वैतत्तीर्थं कालेन किं फलं अंडलिंदू नाम तीर्थं च वरदातटशोभितं ४
पवित्रकारणं नृणां स्नानान्मुक्तिप्रसंचयत् वैरोचनापुरे कश्चित् ज्ञानविद्योपजीवकः ५
ज्ञानविद्यो ब्राह्मणः क्षीणपुण्यश्च वसन्नासीत्कुलाधरः अन्यकन्याः क्रमं लब्धा गायनं तु समुन्नमे ६
शिक्षयित्वा च तासां तु विक्रयेणोपजीविकां कुर्वन्नैव वशात्सोपि मृतो विंध्याद्रिकानने ७
वैन्यात्तटं समासाद्य जातस्यार्थ्वकीक्रिया तथापि कर्मभोगाय पक्षिदेहमवाप सः ८
अंडलिंदू नाम पक्षी को जातस्तत्रैव कानने नानापक्षिकुलांडानि भक्षयन्विचरन्नसौ ९
विंध्याद्रिचरणोपांते तटिनीमन्वगात्खगः उच्चैर्न्यग्रोधशाखायां मासीनां गानितर्कयात् १०
व्याधेन सहसा दृष्ट्वा हतो दिग्धशरेण सः मृतावस्थां ततः पक्षी धृत्वानीतो नदीतटे ११
तं विपक्षं व्याघ्रुश्च स्यार्थं प्रेक्ष्य यत्रांतिकं तथा कोपि चांडालबालश्च क्षुधार्तस्तत्र चागतः १२

तस्मात्तन्मांसपिंडस्य ग्रासमात्रं नियच्छयः सुरेवकवरूथन्या बद्धिमानं समपश्यत् १३
किंकिणीजालशोभाढ्यं दिव्यं दिव्यगणान्वितं चकितश्च तदा व्याधो लुंठितः सहसा गणैः १४
गृहीत्वा कुणपं व्याघ्रात्सक्षिप्तस्तैः ससंभ्रमं दिव्यरूपधरं हंसं समारोप्य विमानके १५
नीतः सोपींद्रपुरं सम्यक् स्वर्गभोगाय सत्वरं ततः प्रभृति तत्तीर्थं राजतं वरदातटे १६
विख्यातमंडलिट् नाम्ना महत्पुण्यफलप्रदं अंडलिट्मुक्तिदं तीर्थं महापापौघनाशनं १७
आख्यातं तस्य माहात्म्यं सघोनाकनिवासदं ऋषय ऊ० देवर्षे नारद श्रुत्वैतमेतत्कथानकं १८
कौतूहलं परं तत्र संशयो भाति नो हृदि तमुत्सार्य फलव्यक्तिं जंतूनां कर्मजां वद १९
अप्राप्य मानुषं देहं कथं तीर्थफलप्रदं अहेतुकामेवं मुक्तिः सदाचरणमं नरा २०
पक्षियोनिं च संप्राप्य हत्यायोनिं समुक्तिनाक तत्सर्वं मंजसास्माकं श्रावणीयं यथातथा २१
नारद उ० अस्ति कारणमेतस्य पक्षिणो मुक्तिदायकं तच्छ्रोतव्यं समासेन सावधानतयाधुना २२
कान्याधरकलाजीवी तस्य काकीतकन्यका लघीयसी सुसाध्वी च गीतनृत्यकलावती २३

देवद्विजपरा चातिसौंदर्यगुणशालिनी सौभाग्यदीपिकानाम्नी पितृभक्तिपरायणा २४
स्वच्छया विचरंती सा बकुमौरस्यपणप्रिया अनेकदेशभूपालातापयित्वार्थमग्रहीत् २५
नानानागरिकास्तोष्य चरंती पृथिवीतले सा नदी दैवयोगेन संप्राप्ता वरदातटं २६
ऋजालासंगमे स्नात्वा कार्त्तिक्यां चलयार्चितः सिद्धनाथे ततो विप्रान् पितृकार्यं यथाविधि २७
हिरण्येन फलैर्भक्ष्यैर्वस्त्रैराभरणैस्तथा दीनानंधांश्च दुःखार्त्तांस्तर्पयित्वा मुदान्वितः २८
।चलिता कुंडिनेशस्य नगरीं राजसेवितां तेन पुण्यप्रभावेन तीर्थजातेन तत्सुतः २९
अंडलिटू पक्षिणो जाता मुक्तिः स्वर्गनिवासदा ऋषय ऊ० सत्यं तत्कारणं साधु श्रुतं नारद त्वन्मुखात् ३०
अधुना व्याधपुरुषः किं जातं कारणं वद। नारद उ० विमानमंतरिक्षे च स्थापयित्वा गणैर्मुदा ३१
तं व्याधं संश्रिरे प्राहुस्तेषां मोक्षो भविष्यति इत्युक्त्वा ते गणाः पक्षी नीतो नाकपुरं प्रति ३२
ऋषय ऊचुः श्रीनारद मुने प्रोक्तमंडलिद्पक्षिणोतुलं मुक्तिकारणमात्रापि संदेहो नः समुत्थितः ३३
स एवमेवता छेघोव रूपव्यलपयागुरो कैकटेमरणं प्राप्य पापयोनिगतः पुनः ३४

२६

तेनैवजन्मनामुक्तोवदतत्कारणंविभो इतिसंशयमुछेघसूक्ष्मकर्मफलंमहत् ३५
किंजातंतन्नरस्यात्र भविभ्रैयेतन्निवेघतां नारदः मुनयस्तस्ययत्पुण्यंजातंगीतापसेविनः ३६
तद्वक्तुंशक्यतेकेन मोक्षमार्गस्यसाधनं वीणावादनतत्वज्ञःश्रुतिजालविशारद ३७
तालज्ञश्चाप्रयासेनमोक्षमार्गंचगछति भस्यद्गीतवादित्रैस्तालैरानंदयन्द्विजः ३८
शिवरात्रिदिनेरात्रौशिवभक्तिपरायणः सोपवासःशिवस्थानेकरोज्जितंत्रिवार्षिकी ३९
तेनपुण्येनमुक्तःसन्गतःकैलासमंदिरं नारदासक्तःसदाविष्णुर्नादासक्तःसदाशिवः ४०
नादएवपरंब्रह्मतस्मान्नादरतोस्म्यहं वीणांवहामितेनैवकारणेननिरंतरं ४१
एषएवजपोध्यानंलयोनादात्मकोमम एवंभक्तःसदाकालोनीयतेमुनयोमया ४२
इतिभक्तिकृतंपुंसःपुनस्तत्केन्यथाकृतं पारलौकिकमाचारंतीर्थश्राद्धादिसत्क्रियां ४३
तेनस्वर्गगतिर्जाताकिंचित्रंतन्नरस्यच सस्वर्गात्सरतानीतःशिवलोकंचतत्क्षणे ४४
इति लोकद्वयंप्राप्यतस्यजातासलोकता इतिसिद्धेशमाहात्म्यमंडलिंद्रपक्षिणस्तथा ४५

२६

२७

मुक्तिकारणतीर्थस्यमाहात्म्यंप्रोक्तमुत्तमं ऋषयऊचुः श्रीमताब्रह्मविज्ञेनयदुक्तं
सत्कथानकं ४६ परमाश्चर्यरूपंचमोक्षसाधनकारणं तेनधन्यावयंजातानिःसंदि
ग्धंचनारद ४७ कृतार्थाअपिश्रेयोस्माछ्रावयाग्रेपगाफलं नारदउवाच कुंडिनापु
रपूर्वाणियानितीर्थानितत्फलं ४८ श्रावयिष्येचपुरतःकालेशोगौतमीनटे अ
धुनाहंगमिष्यामिकालेशंवीक्षितुंद्रुतं ४९ यतोमध्यान्हिकीसर्वाक्रियातत्र
फलप्रदा कोटितीर्थानिपंचाशदधिकानिवसंतिहि ५० कलौचमणिक
र्णंचिकालेशोपिचतीर्थके सूतउवाच इत्युक्त्वांतर्दधेतत्रमुनीनामग्रतः
क्षणात् ५१ नारदःकालकालेशंद्रष्टुकामोत्रमनप्रियः ५२॥ इतिश्री
ब्रह्मांडपुराणेविंध्याद्रिखंडेवरदामाहात्म्येनारदस्यकालेश्वरगमनंनामद
शमोध्यायः १० ७ हीनानाथपावकेनेदंपरोपकारार्थंचलिखितं ७ ७

२७

२०

वासिष्ठवरदे वराहमुखजे विंध्याचरनभंगजे विघ्नवंदिनि वेल्लवीति विम
लेवागमृताल्हासिनी वाग्देवी त्रिपथे विरंचिजनुते वैदर्भे देशोकमे गंगे वैब
रप्रायिनीति। वरदे त्वं देहि श्रीघ्रं वरं २ वरदे वरदानदे मुद्दे सुखदे सर्वदान
जनस्यनाकदे भवसिंधुहृदे निमज्जतः करदे संविदबिंदुदे विदे २ नमो
देवि नमो देवि त्रिपथे त्रिवहे ङ्कुलं वरं देहि वरं देहि वरदे वाक्प्रदे विदे २
वराहवदनाज्जाते वरदे लोकपावनि वसिष्ठप्रार्थिते गोदे गृहाणार्घ्यं
नमोस्तु ते ४ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

२०

॥ ईतिवशिष्ठमाहात्मासमाप्तः ॥